# শ্রীমূকপঞ্চশতী

{॥ শ্রীমূকপঞ্চশতী ॥}

{মাতা মরকতশ্যামা মাতঙ্গী মদশালিনী ।}

{কুর্যাত্ কটাক্ষং কল্যাণী কদম্ববনবাসিনী ॥}

{॥ শ্রীঃ ॥}

{॥ শ্রীচন্দ্রমৌলীশ্বরায নমঃ ॥}

{॥ শ্রীকারণপরচিদ্রূপাযৈ নমঃ ॥}

{শ্রীমূকমহাকবিপ্রণীতা}

{॥ শ্রীঃ ॥}

{॥ শ্রীমূকপঞ্চশতী ॥}

{শ্রীকামাক্ষীপরদেবতাযাঃ পাদারবিন্দযোঃ}

{ভক্তিভরেণ সমর্পিতম্ ॥}

আর্যামেব বিভাবযন্মনসি যঃ পাদারবিন্দং পুরঃ

পশ্যন্নারভতে স্তুতিং স নিযতং লব্ধ্বা কটাক্ষচ্ছবিম্ ।

কামাক্ষ্যা মৃদুলস্মিতাংশুলহরীজ্যোৎস্নাবযস্যান্বিতা-

মারোহত্যপবর্গসৌধবলভীমানন্দবীচীমযীম্॥

[মন্দস্মিত ১০১ ]

শ্রীমৎপরমহংসপরিব্রাজকাচার্যবর্য শ্রীকামকোটিপীঠাধীশ্বর-

জগদ্গুরু শ্রীমত্ চন্দ্রশেখরেন্দ্রসরস্বতী শ্রীপাদানাং

শ্রীমুখেন সমদ্ভাসিতা

{॥ শ্রীঃ ॥}

{॥ শ্রীচন্দ্রমৌলীশ্বর ॥}

{মুদ্রা}

স্বস্তি শ্রীমদখিলভূমণ্ডলালংকার-ত্রয়স্ত্রিংশৎকোটি-

দেবতাসেবিত শ্রীকামাক্ষীদেবীসনাথ-শ্রীমদেকাম্রনাথ-

শ্রীমহাদেবীসনাথ-শ্রীহস্তিগিরিনাথ-সাক্ষাৎকারপরম-

অধিষ্ঠানসত্যব্রতনামাঙ্কিত-কাঞ্চীদিব্যক্ষেত্রে শারদা-

মঠসুস্থিতানাম্, অতুলিতসুধারসমাধুর্যকমলাসনকামিনী-

ধম্মিল্ল সম্ফুল্লমল্লিকামালিকানিষ্যন্দমকরন্দঝরী-

সৌবস্তিকবাঙ্নিগুম্ভবিজৃম্ভণানন্দতুন্দিলিতমণীষি-

মণ্ডলানাম্, অনবরতাদ্বৈতবিদ্যাবিনোদরসিকানাম্,

নিরন্তরালংকৃতীকৃতশান্তিদান্তিভূম্নাম্, সকলভুবন-

চক্রপ্রতিষ্ঠাপক শ্রীচক্রপ্রতিষ্ঠাবিখ্যাতযশোঽলংকৃতানাম্,

নিখিলপাষণ্ডষণ্ডকণ্টকোদ্ঘাটনেন বিশদীকৃতবেদবেদান্ত-

মার্গষণ্মতপ্রতিষ্ঠাপকাচার্যাণাম্, শ্রীমৎপরমহংসপরিব্রাজক-

আচার্যবর্য-শ্রীজগদ্গুরু শ্রীমচ্ছংকরভগবৎপাদাচার্যাণাম্

অধিষ্ঠানে সিংহাসনাভিষিক্ত শ্রীমন্মহাদেবেন্দ্রসরস্বতী-

সংযমীন্দ্রাণাম্, অন্তেবাসিবর্য শ্রীমচ্চন্দ্রশেখরেন্দ্রসরস্বতী

শ্রীপাদৈঃ ।

{ক্রিয়তে নারায়ণস্মৃতিঃ}

তত্রভবান্ মূক ইতি সুপ্রসিদ্ধঃ মহাকবিশিরোমণিঃ

শ্রীকামাক্ষীদেবীকরুণাকটাক্ষতরঙ্গিতপুণ্যকবিতারসপূরঃ

'মূকপঞ্চশতী' ইতি কর্তুর্নাম্না প্রসিদ্ধমিমং লোকোত্তরং

গ্রন্থং প্রণীয় ভূমণ্ডলেঽনুত্তমং পুণ্যযশোবিশেষং শাশ্বতীং

পরানন্দানুভূতিং চ লব্ধবানিতি সুবিদিতমেব । স্তোত্ররত্নে

চাস্মিন্ কাঞ্চীমধ্যগত কামকোটিপীঠাধিষ্ঠাত্রীম্

ইন্দুমৌলেরৈশ্বর্যরূপাং শ্রীকামাক্ষীং পরদেবতাম্,

আরূঢযৌবনাটোপা, তরুণিমসর্বস্বং, নিত্যতরুণী,

লাবণ্যামৃততরঙ্গমালা, বিভ্রমসমবায়সারসন্নাহা,

শৃঙ্গারাদ্বৈততন্ত্রসিদ্ধান্তং, মীনধ্বজতন্ত্রপরমতাৎপর্যং\,

কন্দর্পসূতিকাপাঙ্গী, মনসিজসাম্রাজ্যগর্ববীজং,

পুষ্পায়ুধবীর্যসরসপরিপাটী, মদনাগমসময়দীক্ষিত-

কটাক্ষা, কুসুমশরগর্বসম্পৎকোশগৃহম্, অনঙ্গব্রহ্মতত্ত্ব-

বোধসিরা, পঞ্চশরশাস্ত্রবোধনপরমাচার্যদৃষ্টিপাতা

ইত্যাদিরূপেণ বর্ণয়ন্ পুনঃ লাবণ্যামৃতপরকাষ্ঠাভূতাং

তামেব পরদেবতাং, কারণপরচিদ্রূপা, কৈবল্যানন্দকন্দঃ,

আম্নায়রহস্যম্, উপনিষদরবিন্দকুহরমধুধারা,

বাঙ্মনোঽতীতা, আনন্দাদ্বৈতকন্দলী, মুক্তিবীজম্,

আগমসল্লাপসারযাথার্থ্যং, বোধামৃতবীচী, অভিদাকৃতিঃ,

ঐকাত্ম্যপ্রকৃতিঃ, নিগমবচস্সিদ্ধান্তঃ, গুরুমূর্তিঃ, ইত্যেবং-

রূপেণ সাক্ষৎকুর্বন্ যৌবনশৃঙ্গারাদিবিষযরসানুভব-

সামগ্রীং জ্ঞানবৈরাগ্যাদিব্রহ্মানন্দানুভবসামগ্রীত্বেন

সম্পাদযন্ -

"শিব শিব পশ্যন্তি সমং শ্রীকামাক্ষীকটাক্ষিতাঃ পুরুষাঃ ।

বিপিনং ভবনমমিত্রং মিত্রং লোষ্টং চ যুবতিবিম্বোষ্ঠম্ ॥"

ইতি পরদেবতানুগ্রহফলীভূতাং পরবৈরাগ্যকাষ্ঠাং প্রকটযতি ।

[আর্যা ৪৮ ]

পদ্মপঞ্চশতকাত্মকেঽত্র গ্রন্থে শতকানাং যা আনুপূর্বী

তস্যামযং বিশেষো দৃশ্যতে । যথা কশ্চন শিশুঃ চক্ষুরাদি

ইন্দ্রিযপ্রাগল্ভ্যাবির্ভাবাৎপূর্বং মনোবৃত্তিমাত্রেণ কলযতি

স্বেপ্সিতম্ ; এবমার্যাশতকে ভক্তশিশোঃ মনঃ প্রবৃত্তিম্

অম্বিকাযাঃ স্বরূপানুসন্ধানপটীযসীং সম্পাদযতি

কবিপুঙ্গবঃ ; অযমাশযঃ -

"অন্তরপি বহিরপি ত্বং জন্তুততেরন্তকান্তকৃদহন্তে ।

চিন্তিতসন্তানবতাং সন্ততমপি তন্তনীষি মহিমানম্ ॥"

ইতি শ্লোকেন সূচিতঃ ॥ [আর্যা ৯৮ ]

দ্বিতীযশতকে তাবত্ যথা কিঞ্চিৎপ্রবৃদ্ধগ্রহণশক্তিঃ

বালকঃ খান্তিকে বিদ্যমানস্য বস্তুনঃ দর্শন-

স্পর্শনাদিভিঃ আহ্লাদমধিগচ্ছতি তদ্বত্ ভক্তবালকঃ

অত্যন্তমধোভাগে বিদ্যমানস্য স্বস্যান্তিকত্বেনৈব

জগন্মাতুঃ নিরন্তরধ্যানফলীভূত পাদারবিন্দ দর্শন-

আনন্দমনুভবতীত্যযমাশযঃ -

"মরালীনাং যানাভ্যসনকলনামূলগুরবে

দরিদ্রাণাং ত্রাণব্যতিকরসুরোদ্যানতরবে ।

তমস্কাণ্ডপ্রৌঢিপ্রকটনতিরস্কারপটবে

জনোঽযং কামাক্ষ্যাশ্চরণনলিনায স্পৃহযতে ॥"

ইতি শ্লোকেন সূচিতঃ ॥ [পাদারবিন্দ ৩ ]

যথা মনসঃ জ্ঞানেন্দ্রিযাণাং চ স্ফূর্ত্যনন্তরমেব

বাক্প্রসরতি, তথৈব আর্যাপাদারবিন্দশতকযোরনন্তরং

স্বপ্রেমাস্পদং বস্তু নিরর্গলং স্তোতুমারভতে -

"পাণ্ডিত্যং পরমেশ্বরি স্তুতিবিধৌ নৈবাশ্রযন্তে গিরাং

বৈরিঞ্চান্যপি গুম্ফনানি বিগলদ্গর্বাণি শর্বাণি তে ।

স্তোতুং ত্বাং পরিফুল্লনীলনলিনশ্যামাক্ষি কামাক্ষি মাং

বাচালীকুরুতে তথাপি নিতরাং ত্বৎপাদসেবাদরঃ ॥"

ইতাদিনা স্তুতিশতকেন । [স্তুতি ১ ]

লৌকিকাবিদ্যাদিষু কুশলঃ কশ্চন যথা লৌকিকসম্পদঃ

প্রাপ্তুর্মহো ভবতি তদ্বত্ পূর্বকৃতস্তুতিফলত্বেন ভক্তঃ

অম্বিকাযাঃ কটাক্ষবিশেষমধিগম্য পরসংবিদনুভূত্য-

উচিততেজঃপুষ্ট্যাদিপাত্রং ভবতীত্যযমাশযঃ-

"অস্তং ক্ষণান্নযতু মে পরিতাপসূর্য-

মানন্দচন্দ্রমসমানযতাং প্রকাশম্ ।

কালান্ধকারসুষমাং কলযন্ দিগন্তে

কামাক্ষি কোমলকটাক্ষনিশাগমস্তে ॥"

ইত্যাদিভির্বর্ণনৈঃ কটাক্ষশতকে সূচিতঃ ॥ [কটাক্ষ ৬ ]

যথা লৌকিকসম্পৎসম্পূর্ণঃ কশ্চন সমগ্রযৌবনঃ

লৌকিকশৃঙ্গারসুখানুভবায পাত্রং ভবতি, তদ্বত্

দেব্যাঃ পরমানুগ্রহপাত্রীভূতঃ তদীযমন্দস্মিত-

চন্দ্রিকাসনাথঃ আনন্দচন্দ্র ইব অলৌকিক-

নিরতিশযানন্দানুভবাত্মকঃ প্রকাশত ইতি

অমূমেব ভাবপ্রণালিকাং মহাকবিঃ স্বযমেব

পঞ্চশতীপূর্তিস্পদ্যেন আবিষ্যকরোতি । যথা -

"আর্যামেব বিভাবযন্মনসি যঃ পাদারবিন্দং পুরঃ

পশ্যন্নারভতে স্তুতিং স নিযতং লব্ধ্বা কটাক্ষচ্ছবিম্ ।

কামাক্ষ্যা মৃদুলস্মিতাংশুলহরীজ্যোৎস্নাবযস্যান্বিতা-

মারোহত্যপবর্গসৌধবলভীমানন্দবীচীমযীম্ ॥"

ইতি । [মন্দস্মিত ১০১ ]

অস্যা লোকোত্তরাযাঃ স্তুতেঃ পঠনমাত্রেণ তৎক্ষণে

মহাকবিনাঽমুনা অন্ততঃ পরদেবতযৈব বা

ঐকাত্ম্যমনুভবতীব সাধকঃ ।

তদিদং গ্রন্থরত্নং দ্রাবিডভাষামযার্থানুবাদ-

সহিতমচিরাদেব মহতা পরিশ্রমেণ ভক্তিভরেণ

মুদ্রাপ্য শ্রী কামাক্ষী দেবী কুম্ভাভিষেক শুভ-

মুহূর্ত এব উপহারীকৃতবতে, মুদ্রাপণদিবিষযে পরমং

সাহায্যমাচরিতবদ্ভযঃ, তদ্গ্রন্থপঠিতৃভ্যশ্চ

ভক্তপুঙ্গবেভ্যঃ শ্রীকামাক্ষীকটাক্ষাঃ সমুল্ল-

সন্ত্বিত্যাশাস্মহে॥

{॥ ইতি নারাযণস্মৃতিঃ ॥}

{॥ আর্যাশতকম্ ॥}

কারণপরচিদ্রূপা কাঞ্চীপুরসীম্নি কামপীঠগতা ।

কাচন বিহরতি করুণা কাশ্মীরস্তবককোমলাঙ্গলতা ॥ ১॥

কংচন কাঞ্চীনিলযং করধৃতকোদণ্ডবাণসৃণিপাশম্ ।

কঠিনস্তনভরনম্রং কৈবল্যানন্দকন্দমবলম্বে ॥ ২॥

চিন্তিতফলপরিপোষণচিন্তামণিরেব কাঞ্চিনিলযা মে ।

চিরতরসুচরিতসুলভা চিত্তং শিশিরযতু চিৎসুখাধারা ॥ ৩॥

কুটিলকচং কঠিনকুচং কুন্দস্মিতকান্তি কুঙ্কুমচ্ছাযম্ ।

কুরুতে বিহৃতিং কাঞ্চ্যাং কুলপর্বতসার্বভৌমসর্বস্বম্ ॥ ৪॥

পঞ্চশরশাস্ত্রবোধনপরমাচার্যেণ দৃষ্টিপাতেন ।

কাঞ্চীসীম্নি কুমারী কাচন মোহযতি কামজেতারম্ ॥ ৫॥

পরযা কাঞ্চীপুরযা পর্বতপর্যাযপীনকুচভরযা ।

পরতন্ত্রা বযমনযা পঙ্কজসব্রহ্মচারিলোচনযা ॥ ৬॥

ঐশ্বর্যমিন্দুমৌলেরৈকাত্ম্যপ্রকৃতি কাঞ্চিমধ্যগতম্ ।

ঐন্দবকিশোরশেখরমৈদম্পর্যং চকাস্তি নিগমানাম্ ॥ ৭॥

শ্রিতকম্পসীমানং শিথিলিতপরমশিবধৈর্যমহিমানম্ ।

কলযে পটলিমানং কংচন কঞ্চুকিতভুবনভূমানম্ ॥ ৮॥

আদৃতকাঞ্চীনিলযমাদ্যামারূঢযৌবনাটোপাম্ ।

আগমবতংসকলিকামানন্দাদ্বৈতকন্দলীং বন্দে ॥ ৯॥

তুঙ্গাভিরামকুচভরশৃঙ্গারিতমাশ্রযামি কাঞ্চিগতম্ ।

গঙ্গাধরপরতন্ত্রং শৃঙ্গারাদ্বৈততন্ত্রসিদ্ধান্তম্ ॥ ১০॥

কাঞ্চীরত্নবিভূষাং কামপি কন্দর্পসূতিকাপাঙ্গীম্ ।

পরমাং কলামুপাসে পরশিববামাঙ্কপীঠিকাসীনাম্ ॥ ১১॥

কম্পাতীচরাণাং করুণাকোরকিতদৃষ্টিপাতানাম্ ।

কেলীবনং মনো মে কেষাংচিদ্ভবতু চিদ্বিলাসানাম্ ॥ ১২॥

আম্রতরুমূলবসতেরাদিমপুরুষস্য নযনপীযূষম্ ।

আরব্ধযৌবনোৎসবমাম্নাযরহস্যমন্তরবলম্বে ॥ ১৩॥

অধিকাঞ্চি পরমযোগিভিরাদিমপরপীঠসীম্নি দৃশ্যেন ।

অনুবদ্ধং মম মানসমরুণিমসর্বস্বসম্প্রদাযেন ॥ ১৪॥

অঙ্কিতশংকরদেহামঙ্কুরিতোরোজকঙ্কণাশ্লেষৈঃ ।

অধিকাঞ্চি নিত্যতরুণীমদ্রাক্ষং কাংচিদদ্ভুতাং বালাম্ ॥ ১৫॥

মধুরধনুষা মহীধরজনুষা নন্দামি সুরভিবাণজুষা ।

চিদ্বপুষা কাঞ্চিপুরে কেলিজুষা বন্ধুজীবকান্তিমুষা ॥ ১৬॥

মধুরস্মিতেন রমতে মাংসলকুচভারমন্দগমনেন ।

মধ্যেকাঞ্চি মনো মে মনসিজসাম্রাজ্যগর্ববীজেন ॥ ১৭॥

ধরণিমযীং তরণিমযীং পবনমযীং গগনদহনহোতৃমযীম্ ।

অম্বুমযীমিন্দুমযীমম্বামনুকম্পমাদিমামীক্ষে ॥ ১৮॥

লীনস্থিতি মুনিহৃদয়ে ধ্যানস্তিমিতং তপস্যদুপকম্পম্ ।
পীনস্তনভরমীডে মীনধ্বজতন্ত্রপরমতাৎপর্যম্ ॥ ১৯॥

শ্বেতা মন্থরহসিতে শাতা মধ্যে চ বাঙ্মনোঽতীতা ।
শীতা লোচনপাতে স্ফীতা কুচসীম্নি শাশ্বতী মাতা ॥ ২০॥

পুরতঃ কদা ন করবৈ পুরবৈরিবিমর্দপুলকিতাঙ্গলতাম্ ।
পুনতীং কাঞ্চীদেশং পুষ্পায়ুধবীর্যসরসপরিপাটীম্ ॥ ২১॥

পুণ্যা কাঽপি পুরন্ধ্রী পুঙ্খিতকন্দর্পসম্পদা বপুষা ।
পুলিনচরী কম্পায়াঃ পুরমথনং পুলকনিচুলিতং কুরুতে ॥ ২২॥

তনিমাদ্বৈতবলগ্নং তরুণারুণসম্প্রদায়তনুলেখম্ ।
তটসীমনি কম্পায়াস্তরুণিমসর্বস্বমাদ্যমদ্রাক্ষম্ ॥ ২৩॥

পৌষ্টিককর্মবিপাকং পৌষ্পশরং সবিধসীম্নি কম্পায়াঃ ।
অদ্রাক্ষমাত্তযৌবনমভ্যুদয়ং কংচিদর্ধশশিমৌলেঃ ॥ ২৪॥

সংশ্রিতকাঞ্চীদেশে সরসিজদৌর্ভাগ্যজাগ্রদুত্তংসে ।
সংবিন্ময়ে বিলীয়ে সারস্বতপুরুষকারসাম্রাজ্যে ॥ ২৫॥

মোদিতমধুকরবিশিখং স্বাদিমসমুদায়সারকোদণ্ডম্ ।

আদৃতকাঞ্চীখেলনমাদিমমারুণ্যভেদমাকলযে ॥ ২৬॥

উররীকৃতকাঞ্চিপুরীমুপনিষদরবিন্দকুহরমধুধারাম্ ।
উন্নম্রস্তনকলশীমুৎসবলহরীমুপাস্মহে শম্ভোঃ ॥ ২৭॥

এণশিশুদীর্ঘলোচনমেনঃপরিপন্থি সন্ততং ভজতাম্ ।
একাম্রনাথজীবিতমেবম্পদদূরমেকমবলম্বে ॥ ২৮॥

স্মযমানমুখং কাঞ্চীভযমানং কমপি দেবতাভেদম্ ।
দযমানং বীক্ষ্য মুহুর্বযমানন্দামৃতাম্বুধৌ মগ্নাঃ ॥ ২৯॥

কুতুকজুষি কাঞ্চিদেশে কুমুদতপোরাশিপাকশেখরিতে ।
কুরুতে মনোবিহারং কুলগিরিপরিবৃঢকুলৈকমণিদীপে ॥ ৩০॥

বীক্ষেমহি কাঞ্চিপুরে বিপুলস্তনকলশগরিমপরবশিতম্ ।
বিদ্রুমসহচরদেহং বিভ্রমসমবাযসারসন্নাহম্ ॥ ৩১॥

কুরুবিন্দগোত্রগাত্রং কূলচরং কমপি নৌমি কম্পাযাঃ ।
কূলংকষকুচকুম্ভং কুসুমাযুধবীর্যসারসংরম্ভম্ ॥ ৩২॥

কুড্মলিতকুচকিশোরৈঃ কুর্বাণৈঃ কাঞ্চিদেশসৌহার্দম্ ।
কুঙ্কুমশোণৈর্নিচিতং কুশলপথং শম্ভুসুকৃতসম্ভারৈঃ ॥ ৩৩॥

অঙ্কিতকচেন কেনচিদন্ধংকরণৌষধেন কমলানাম্ ।

অন্তঃপুরেণ শম্ভোরলংক্রিয়া কাঽপি কল্প্যতে কাঞ্চ্যাম্ ॥ ৩৪॥

ঊরীকরোমি সন্ততমূষ্মলফালেন ললিতং পুংসা ।

উপকম্পমুচিতখেলনমুর্বীধরবংশসম্পদুন্মেষম্ ॥ ৩৫॥

অঙ্কুরিতস্তনকোরকমঙ্কালংকারমেকচূতপতেঃ ।

আলোকেমহি কোমলমাগমসংলাপসারযাথার্থ্যম্ ॥ ৩৬॥

পুঞ্জিতকরুণমুদঞ্চিতশিঞ্জিতমণিকাঞ্চি কিমপি কাঞ্চিপুরে ।

মঞ্জরিতমৃদুলহাসং পিঞ্জরতনুরুচি পিনাকিমূলধনম্ ॥ ৩৭॥

লোলহৃদযোঽস্তি শম্ভোর্লোচনযুগলেন লেহ্যমানাযাম্ ।

ললিতপরমশিবাযাং লাবণ্যামৃততরঙ্গমালাযাম্ ॥ ৩৮॥

মধুকরসহচরচিকুরৈর্মদনাগমসমযদীক্ষিতকটাক্ষৈঃ ।

মণ্ডিতকম্পাতীরৈর্মঙ্গলকন্দৈর্মমাস্তু সারূপ্যম্ ॥ ৩৯॥

বদনারবিন্দবক্ষোবামাঙ্কতটীবশংবদীভূতা ।

পূরুষত্রিতযে ত্রেধা পুরন্ধ্রিরূপা ত্বমেব কামাক্ষি ॥ ৪০॥

বাধাকরীং ভবাব্ধেরাধারাদ্যম্বুজেষু বিচরন্তীম্ ।

আধারীকৃতকাঞ্চী বোধামৃতবীচিমেব বিমৃশামঃ ॥ ৪১॥

কলযাম্যন্তঃ শশধরকলযাঽঙ্কিতমৌলিমমলচিদ্বলযাম্ ।
অলযামাগমপীঠীনিলযাং বলযাঙ্কসুন্দরীমম্বাম্ ॥ ৪২॥

শর্বাদিপরমসাধকগুর্বানীতায কামপীঠজুষে ।
সর্বাকৃতযে শোণিমগর্বাযাস্মৈ সমর্প্যতে হৃদযম্ ॥ ৪৩॥

সমযা সান্ধ্যমযূখৈঃ সমযা বুদ্ধযা সদৈব শীলিতযা ।
উমযা কাঞ্চীরতযা ন মযা লভ্যতে কিং নু তাদাত্ম্যম্ ॥ ৪৪॥

জন্তোস্তব পদপূজনসন্তোষতরঙ্গিতস্য কামাক্ষি ।
বন্ধো যদি ভবতি পুনঃ সিন্ধোরম্ভস্সু বম্ভ্রমীতি শিলা ॥ ৪৫॥

কুণ্ডলি কুমারি কুটিলে চণ্ডি চরাচরসবিত্রি চামুণ্ডে ।
গুণিনি গুহারিণি গুহ্যে গুরুমূর্তে ত্বাং নমামি কামাক্ষি ॥ ৪৬॥

অভিদাকৃতির্ভিদাকৃতিরচিদাকৃতিরপি চিদাকৃতির্মাতঃ ।
অনহন্তা ত্বমহন্তা ভ্রমযসি কামাক্ষি শাশ্বতী বিশ্বম্ ॥ ৪৭॥

শিব শিব পশ্যন্তি সমং শ্রীকামাক্ষীকটাক্ষিতাঃ পুরুষাঃ ।
বিপিনং ভবনমমিত্রং মিত্রং লোষ্টং চ যুবতিবিম্বোষ্ঠম্ ॥ ৪৮॥

কামপরিপন্থিকামিনি কামেশ্বরি কামপীঠমধ্যগতে ।

কামদুঘা ভব কমলে কামকলে কামকোটি কামাক্ষি ॥ ৪৯॥

মধ্যেহৃদযং মধ্যেনিটিলং মধ্যেশিরোঽপি বাস্তব্যাম্ ।

চণ্ডকরশক্রকার্মুকচন্দ্রসমাভাং নমামি কামাক্ষীম্ ॥ ৫০॥

অধিকাঞ্চি কেলিলোলৈরখিলাগমযন্ত্রতন্ত্রমযৈঃ ।

অতিশীতং মম মানসমসমশরদ্রোহিজীবনোপাযৈঃ ॥ ৫১॥

নন্দতি মম হৃদি কাচন মন্দিরযন্তা নিরন্তরং কাঞ্চীম্ ।

ইন্দুরবিমণ্ডলকুচা বিন্দুবিযন্নাদপরিণতা তরুণী ॥ ৫২॥

শম্পালতাসবর্ণং সম্পাদযিতুং ভবজ্বরচিকিৎসাম্ ।

লিম্পামি মনসি কিংচন কম্পাতটরোহি সিদ্ধভৈষজ্যম্ ॥ ৫৩॥

অনুমিতকুচকাঠিন্যামধিবক্ষঃপীঠমঙ্গজন্মরিপোঃ ।

আনন্দদাং ভজে তামানঙ্গব্রহ্মতত্ত্ববোধসিরাম্ ॥ ৫৪॥

ঐক্ষিষি পাশাঙ্কুশধরহস্তান্তং বিস্মযার্হবৃত্তান্তম্ ।

অধিকাঞ্চি নিগমবাচাং সিদ্ধান্তং শূলপাণিশুদ্ধান্তম্ ॥ ৫৫॥

আহিতবিলাসভঙ্গীমাব্রহ্মস্তম্বশিল্পকল্পনযা ।

আশ্রিতকাঞ্চীমতুলামাদ্যাং বিস্ফূর্তিমাদ্রিয়ে বিদ্যাম্ ॥ ৫৬॥

মূকোঽপি জটিলদুর্গতিশোকোঽপি স্মরতি যঃ ক্ষণং ভবতীম্ ।
একো ভবতি স জন্তুর্লোকোত্তরকীর্তিরেব কামাক্ষি ॥ ৫৭॥

পঞ্চদশবর্ণরূপং কংচন কাঞ্চীবিহারধৌরেয়ম্ ।
পঞ্চশরীয়ং শম্ভোর্বঞ্চনবৈদগ্ধ্যমূলমবলম্বে ॥ ৫৮॥

পরিণতিমতীং চতুর্ধা পদবীং সুধিয়াং সমেত্য সৌষুম্নীম্ ।
পঞ্চাশদর্ণকল্পিতমদশিল্পাং ত্বাং নমামি কামাক্ষি ॥ ৫৯॥

আদিক্ষন্মম গুরুরাডাদিক্ষান্তাক্ষরাত্মিকাং বিদ্যাম্ ।
স্বাদিষ্ঠচাপদণ্ডাং নেদিষ্ঠামেব কামপীঠগতাম্ ॥ ৬০॥

তুষ্যামি হর্ষিতস্মরশাসনয়া কাঞ্চিপুরকৃতাসনয়া ।
স্বাসনয়া সকলজগদ্ভাসনয়া কলিতশম্বরাসনয়া ॥ ৬১॥

প্রেমবতী কম্পায়াং স্থেমবতী যতিমনস্সু ভূমবতী ।
সামবতী নিত্যগিরা সোমবতী শিরসি ভাতি হৈমবতী ॥ ৬২॥

কৌতুকিনা কম্পায়াং কৌসুমচাপেন কীলিতেনান্তঃ ।
কুলদৈবতেন মহতা কুড্মলমুদ্রাং ধুনোতু নঃপ্রতিভা ॥ ৬৩॥

যূনা কেনাপি মিলদ্দেহা স্বাহাসহাযতিলকেন ।
সহকারমূলদেশে সংবিদ্রূপা কুটুম্বিনী রমতে ॥ ৬৪॥

কুসুমশরগর্বসম্পৎকোশগৃহং ভাতি কাঞ্চিদেশগতম্ ।
স্থাপিতমস্মিন্কথমপি গোপিতমন্তর্ময়া মনোরত্নম্ ॥ ৬৫॥

দগ্ধষডধ্বারণ্যং দরদলিতকুসুম্ভসম্ভৃতারুণ্যম্ ।
কলযে নবতারুণ্যং কম্পাতটসীম্নি কিমপি কারুণ্যম্ ॥ ৬৬॥

অধিকাঞ্চি বর্ধমানামতুলাং করবাণি পারণামক্ষ্ণোঃ ।
আনন্দপাকভেদামরুণিমপরিণামগর্বপল্লবিতাম্ ॥ ৬৭॥

বাণসৃণিপাশকার্মুকপাণিমমুং কমপি কামপীঠগতম্ ।
এণধরকোণচূডং শোণিমপরিপাকভেদমাকলযে ॥ ৬৮॥

কিং বা ফলতি মমান্যৈর্বিম্বাধরচুম্বিমন্দহাসমুখী ।
সম্বাধকরী তমসামম্বা জাগর্তি মনসি কামাক্ষী ॥ ৬৯॥

মঞ্চে সদাশিবমযে পরিশিবমযললিতপৌষ্পপর্যঙ্কে ।
অধিচক্রমধ্যমাস্তে কামাক্ষী নাম কিমপি মম ভাগ্যম্ ॥ ৭০॥

রক্ষ্যোঽস্মি কামপীঠীলাসিকযা ঘনকৃপাম্বুরাশিকযা ।

শ্রুতিযুবতিকুন্তলীমণিমালিকযা তুহিনশৈলবালিকযা ॥ ৭১॥

লীযে পুরহরজাযে মাযে তব তরুণপল্লবচ্ছাযে ।
চরণে চন্দ্রাভরণে কাঞ্চীশরণে নতার্তিসংহরণে ॥ ৭২॥

মূর্তিমতি মুক্তিবীজে মূর্ধ্নি স্তবকিতচকোরসাম্রাজ্যে ।
মোদিতকম্পাকূলে মুহুর্মুহুর্মনসি মুমুদিষাঽস্মাকম্ ॥ ৭৩॥

বেদমযীং নাদমযীং বিন্দুমযীং পরপদোদ্যদিন্দুমযীম্ ।
মন্ত্রমযীং তন্ত্রমযীং প্রকৃতিমযীং নৌমি বিশ্ববিকৃতিমযীম্ ॥ ৭৪॥

পুরমথনপুণ্যকোটী পুঞ্জিতকবিলোকসূক্তিরসধাটী ।
মনসি মম কামকোটী বিহরতু করুণাবিপাকপরিপাটী ॥ ৭৫॥

কুটিলং চটুলং পৃথুলং মৃদুলং কচনযনজঘনচরণেষু ।
অবলোকিতমবলম্বিতমধিকম্পাতটমমেযমস্মাভিঃ ॥ ৭৬॥

প্রত্যঙ্মুখ্যা দৃষ্টযা প্রসাদদীপাঙ্কুরেণ কামাক্ষ্যাঃ ।
পশ্যামি নিস্তুলমহো পচেলিমং কমপি পরশিবোল্লাসম্ ॥ ৭৭॥

বিদ্যে বিধাতৃবিষযে কাত্যাযনি কালি কামকোটিকলে ।
ভারতি ভৈরবি ভদ্রে শাকিনি শাম্ভবি শিবে স্তুবে ভবতীম্ ॥ ৭৮॥

মালিনি মহেশচালিনি কাঞ্চীখেলিনি বিপক্ষকালিনি তে।

শূলিনি বিদ্রুমশালিনি সুরজনপালিনি কপালিনি নমোঽস্তু ॥ ৭৯॥

দেশিক ইতি কিং শংকে তত্তাদৃক্তব নু তরুণিমোন্মেষঃ।

কামাক্ষি শূলপাণেঃ কামাগমসমযদীক্ষাযাম্ ॥ ৮০॥

বেতণ্ডকুম্ভডম্বরবৈতণ্ডিককুচভরার্তমধ্যায।

কুঙ্কুমরুচে নমস্যাং শংকরনযনামৃতায রচযামঃ ॥ ৮১॥

অধিকাঞ্চিতমণিকাঞ্চনকাঞ্চীমধিকাঞ্চি কাংচিদদ্রাক্ষম্।

অবনতজনানুকম্পামনুকম্পাকূলমস্মদনুকূলাম্ ॥ ৮২॥

পরিচিতকম্পাতীরং পর্বতরাজন্যসুকৃতসন্নাহম্।

পরগুরুকৃপযা বীক্ষে পরমশিবোৎসঙ্গমঙ্গলাভরণম্ ॥ ৮৩॥

দগ্ধমদনস্য শম্ভোঃ প্রথীযসীং ব্রহ্মচর্যবৈদগ্ধীম্।

তব দেবি তরুণিমশ্রীচতুরিমপাকো ন চক্ষমে মাতঃ ॥ ৮৪॥

মদজলতমালপত্রা বসনিতপত্রা করাদৃতখানিত্রা।

বিহরতি পুলিন্দযোষা গুঞ্জাভূষা ফণীন্দ্রকৃতবেষা ॥ ৮৫॥

অঙ্কে শুকিনী গীতে কৌতুকিনী পরিসরে চ গাযকিনী।

জযসি সবিধেঽম্ব ভৈরবমণ্ডলিনী শ্রবসি শঙ্খকুন্ডলিনী ॥ ৮৬॥

প্রণতজনতাপবর্গা কৃতবহুসর্গা সসিংহসংসর্গা ।

কামাক্ষি মুদিতভর্গা হতরিপুবর্গা ত্বমেব সা দুর্গা ॥ ৮৭॥

শ্রবণচলদ্বেতণ্ডা সমরোদ্দণ্ডা ধুতাসুরশিখণ্ডা ।

দেবি কলিতান্ত্রষণ্ডা ধৃতনরমুণ্ডা ত্বমেব চামুণ্ডা ॥ ৮৮॥

উর্বীধরেন্দ্রকন্যে দর্বীভরিতেন ভক্তপূরেণ ।

গুর্বীমকিংচনার্তি খর্বীকুরুষে ত্বমেব কামাক্ষি ॥ ৮৯॥

তাডিতরিপুপরিপীডনভযহরণ নিপুণহলমুসলা ।

ক্রোডপতিভীষণমুখী ক্রীডসি জগতি ত্বমেব কামাক্ষি ॥ ৯০॥

স্মরমথনবরণলোলা মন্মথহেলাবিলাসমণিশালা ।

কনকরুচিচৌর্যশীলা ত্বমম্ব বালা করাব্জধৃতমালা ॥ ৯১॥

বিমলপটী কমলকুটী পুস্তকরুদ্রাক্ষশস্তহস্তপুটী ।

কামাক্ষি পক্ষ্মলাক্ষী কলিতবিপঞ্চী বিভাসি বৈরিঞ্চী ॥ ৯২॥

কুঙ্কুমরুচিপিঙ্গমসৃক্পঙ্কিলমুণ্ডালিমণ্ডিতং মাতঃ ।

শ্রীকামাক্ষি তদীযসঙ্গমকলামন্দীভবৎকৌতুকঃ

জযতি তব রূপধেযং জপপটপুস্তকবরাভযকরাব্জম্ ॥ ৯৩॥

কনকমণিকলিতভূষাং কালাযসকলহশীলকান্তিকলাম্ ।
কামাক্ষি শীলযে ত্বাং কপালশূলাভিরামকরকমলাম্ ॥ ৯৪ ॥

লোহিতিমপুঞ্জমধ্যে মোহিতভুবনে মুদা নিরীক্ষন্তে ।
বদনং তব কুবযুগলং কাঞ্চীসীমাং চ কেঽপি কামাক্ষি ॥ ৯৫ ॥

জলধিদ্বিগুণিতহুতবহদিশাদিনেশ্বরকলাশ্বিনেযদলৈঃ ।
নলিনৈর্মহেশি গচ্ছসি সর্বোত্তরকরকমলদলমমলম্ ॥ ৯৬॥

সৎকৃতদেশিকচরণাঃ সবীজনির্বীজযোগনিশ্রেণ্যা ।
অপবর্গসৌধবলভীমারোহন্ত্যম্ব কেঽপি তব কৃপযা ॥ ৯৭॥

অন্তরপি বহিরপি ত্বং জন্তুততেরন্তকান্তকৃদহন্তে ।
চিন্তিতসন্তানবতাং সন্ততমপি তন্তনীষি মহিমানম্ ॥ ৯৮॥

কলমঞ্জুলবাগনুমিতগলপঞ্জরগতশুকগ্রহৌৎকণ্ঠ্যাত্ ।
অম্ব রদনাম্বরং তে বিম্বফলং শম্বরারিণা ন্যস্তম্ ॥ ৯৯॥

জয জয জগদম্ব শিবে জয জয কামাক্ষি জয জযাদ্রিসুতে ।
জয জয মহেশদযিতে জয জয চিদ্গগনকৌমুদীধারে ॥ ১০০॥

আর্যাশতকং ভক্ত্যা পঠতামার্যাকটাক্ষেণ ।

নিস্সরতি বদনকমলাদ্বাণী পীযূষধোরণী দিব্যা ॥ ১০১॥

{আর্যাশতকং সম্পূর্ণম্ ॥}

{॥ পাদারবিন্দশতকম্ ॥}

মহিম্নঃ পন্থানং মদনপরিপন্থিপ্রণযিনি

প্রভুর্নির্ণেতুং তে ভবতি যতমানোঽপি কতমঃ ।

তথাপি শ্রীকাঞ্চীবিহৃতিরসিকে কোঽপি মনসো

বিপাকস্ত্বৎপাদস্তুতিবিধিষু জল্পাকযতি মাম্ ॥ ১॥

গলগ্রাহী পৌরন্দরপুরবনীপল্লবরুচাং

ধৃতপাথম্যানামরুণমহসামাদিমগুরুঃ ।

সমিন্ধে বন্ধূকস্তবকসহযুধ্বা দিশি দিশি

প্রসর্পন্কামাক্ষ্যাশ্চরণকিরণানামরুণিমা ॥ ২॥

মরালীনাং যানাভ্যসনকলনামূলগুরবে

দরিদ্রাণাং ত্রাণব্যতিকরসুরোদ্যানতরবে ।

তমস্কাণ্ডপ্রৌঢিপ্রকটনতিরস্কারপটবে

জনোঽযং কামাক্ষ্যাশ্চরণনলিনায স্পৃহযতে ॥ ৩॥

বহন্তী সৈন্দূরীং সরণিমবনম্রামরপুরী-

পুরন্ধ্রীসীমন্তে কবিকমলবালার্কসুষমা ।

ত্রযীসীমন্তিন্যাঃ স্তনতটনিচোলারুণপটী

বিভান্তী কামাক্ষ্যাঃ পদনলিনকান্তির্বিজযতে ॥ ৪॥

প্রণম্রীভূতস্য প্রণযকলহত্রস্তমনসঃ

স্মরারাতেশ্চূডাবিযতি গৃহমেধী হিমকরঃ ।

যযোঃ সান্ধ্যাং কান্তিং বহতি সুষমাভিশ্চরণযোঃ

তযোর্মে কামাক্ষ্যা হৃদযমপতন্দ্রং বিহরতাম্ ॥ ৫॥

যযোঃ পীঠাযন্তে বিবুধমুকুটীনাং পটলিকা

যযোঃ সৌধাযন্তে স্বযমুদযভাজো ভণিতযঃ ।

যযোঃ দাসাযন্তে সরসিজভবাদ্যাশ্চরণযোঃ

তযোর্মে কামাক্ষ্যা দিনমনু বরীবর্তু হৃদযম্ ॥ ৬॥

নযন্তী সংকোচং সরসিজরুচং দিক্পরিসরে

সৃজন্তী লৌহিত্যং নখকিরণচন্দ্রার্ধখচিতা ।

কবীন্দ্রাণাং হৃৎকৈরববিকসনোদ্যোগজননী

স্ফুরন্তী কামাক্ষ্যাঃ চরণরুচিসন্ধ্যা বিজযতে ॥ ৭॥

বিরাবৈর্মাঞ্জীরৈঃ কিমপি কথযন্তীব মধুরং

পুরস্তাদানম্রে পুরবিজযিনি স্মেরবদনে ।

বযস্যেব প্রৌঢা শিথিলযতি যা প্রেমকলহ-

প্ররোহং কামাক্ষ্যাঃ চরণযুগলী সা বিজযতে ॥ ৮॥

সুপর্বস্ত্রীলোলালকপরিচিতং ষট্পদকুলৈঃ

স্ফুরল্লাক্ষারাগং তরুণতরণিজ্যোতিররুণৈঃ ।

ভৃতং কান্ত্যম্ভোভিঃ বিসৃমরমরন্দৈঃ সরসিজৈঃ

বিধত্তে কামাক্ষ্যাঃ চরণযুগলং বন্ধুপদবীম্ ॥ ৯॥

রজঃসংসর্গেঽপি স্থিতমরজসামেব হৃদযে

পরং রক্তত্বেন স্থিতমপি বিরক্তৈকশরণম্ ।

অলভ্যং মন্দানাং দধদপি সদা মন্দগতিতাং

বিধত্তে কামাক্ষ্যাঃ চরণযুগমাশ্চর্যলহরীম্ ॥ ১০॥

জটালা মঞ্জীরস্ফুরদরুণরত্নাংশুনিকরৈঃ

নিষিদন্তী মধ্যে নখরুচিঝরীগাঙ্গপযসাম্ ।

জগত্ত্রাণং কর্তুং জননি মম কামাক্ষি নিযতং

তপশ্চর্যাং ধত্তে তব চরণপাথোজযুগলী ॥ ১১॥

তুলাকোটিদ্বন্দ্বক্কণিতভণিতাভীতিবচসোঃ

বিনম্রং কামাক্ষী বিসৃমরমহঃপাটলিতযোঃ ।

ক্ষণং বিন্যাসেন ক্ষপিততমসোর্মে ললিতযোঃ

পুনীযান্মূর্ধানং পুরহরপুরন্ধ্রী চরণযোঃ ॥ ১২॥

ভবানি দ্রুহ্যেতাং ভবনিবিড়িতেভ্যো মম মুহু-

স্তমোব্যামোহেভ্যস্তব জননি কামাক্ষি চরণৌ ।

যয়োর্লাক্ষাবিন্দুস্ফুরণধরণাদ্ধূর্জটিজটা-

কুটীরা শোণাঙ্কং বহতি বপুরেণাঙ্ককলিকা ॥ ১৩॥

পবিত্রীকুর্যুর্নঃ পদতলভুবঃ পাটলরুচঃ

পরাগাস্তে পাপপ্রশমনধুরীণাঃ পরশিবে ।

কণং লব্ধুং যেষাং নিজশিরসি কামাক্ষি বিবশা

বলন্তো ব্যাতন্বন্ত্যহমহমিকাং মাধবমুখাঃ ॥ ১৪॥

বলাকামালাভির্নখরুচিময়ীভিঃ পরিবৃতে

বিনম্রস্বর্নারীবিকচকচকালাম্বুদকুলে ।

স্ফুরন্তঃ কামাক্ষি স্ফুটদলিতবন্ধূকসুহৃদ-

স্তটিল্লেখায়ন্তে তব চরণপাথোজকিরণাঃ ॥ ১৫॥

সরাগঃ সদ্বেষঃ প্রসৃমরসরোজে প্রতিদিনং

নিসর্গাদাক্রামন্বিবুধজনমূর্ধানমধিকম্ ।

কথংকারং মাতঃ কথয় পদপদ্মস্তব সতাং

নতানাং কামাক্ষি প্রকটয়তি কৈবল্যসরণিম্ ॥ ১৬॥

জপালক্ষ্মীশোণো জনিতপরমজ্ঞাননলিনী-

বিকাসব্যাসঙ্গো বিফলিতজগজ্জাড্যগরিমা ।

মনঃপূর্বাদ্রিং মে তিলকযতু কামাক্ষি তরসা
তমস্কাণ্ডদ্রোহী তব চরণপাথোজরমণঃ ॥ ১৭॥

নমস্কুর্মঃ প্রেঙ্খন্মণিকটকনীলোৎপলমহঃ-
পযোধৌ রিঙ্খদ্ভির্নখকিরণফেনৈর্ধবলিতে ।
স্ফুটং কুর্বাণায প্রবলচলদৌর্বানলশিখা-
বিতর্কং কামাক্ষ্যাঃ সততমরুণিম্নে চরণযোঃ ॥ ১৮॥

শিবে পাশাযেতামলঘুনি তমঃকূপকুহরে
দিনাধীশাযেতাং মম হৃদযপাথোজবিপিনে ।
নভোমাসাযেতাং সরসকবিতারীতিসরিতি
ত্বদীযৌ কামাক্ষি প্রসৃতকিরণৌ দেবি চরণৌ ॥ ১৯॥

নিষক্তং শ্রুত্যন্তে নযনমিব সদ্বৃত্তরুচিরৈঃ
সমৈর্জুষ্টং শুদ্ধৈরধরমিব রম্যৈর্দ্বিজগণৈঃ ।
শিবে বক্ষোজন্মদ্বিতযমিব মুক্তাশ্রিতমুমে
ত্বদীযং কামাক্ষি প্রণতশরণং নৌমি চরণম্ ॥ ২০॥

নমস্যাসংসজ্জন্নমুচিপরিপন্থিপ্রণযিনী-
নিসর্গপ্রেঙ্খোলৎকুরলকুলকালাহিশবলে ।
নখচ্ছাযাদুগ্ধোদধিপযসি তে বৈদ্রুমরুচাং
প্রচারং কামাক্ষি প্রচুরযতি পাদাব্জসুষমা ॥ ২১॥

কদা দূরীকর্তুং কটুদুরিতকাকোলজনিতং
মহান্তং সন্তাপং মদনপরিপন্থিপ্রিযতমে ।
ক্ষণাত্তে কামাক্ষি ত্রিভুবনপরীতাপহরণে
পটীযাংসং লপ্স্যে পদকমলসেবামৃতরসম্ ॥ ২২॥

যযোঃ সান্ধ্যং রোচিঃ সততমরুণিম্নে স্পৃহযতে
যযোশ্চান্দ্রী কান্তিঃ পরিপততি দৃষ্ট্বা নখরুচিম্ ।
যযোঃ পাকোদ্রেকং পিপঠিষতি ভক্ত্যা কিসলযং
ম্রদিম্নঃ কামাক্ষ্যা মনসি চরণৌ তৌ তনুমহে ॥ ২৩॥

জগন্নেদং নেদং পরমিতি পরিত্যজ্য যতিভিঃ
কুশাগ্রীযস্বান্তৈঃ কুশলধিষণৈঃ শাস্ত্রসরণৌ ।
গবেষ্যং কামাক্ষি ধ্রুবমকৃতকানাং গিরিসুতে
গিরামৈদম্পর্যং তব চরণপদ্মং বিজযতে ॥ ২৪॥

কৃতস্নানং শাস্ত্রামৃতসরসি কামাক্ষি নিতরাং
দধানং বৈশদ্যং কলিতরসমানন্দসুধযা ।
অলংকারং ভূমের্মুনিজনমনশ্চিন্ময়মহা-
পযোধেরন্তস্স্থং তব চরণরত্নং মৃগযতে ॥ ২৫॥

মনোগেহে মোহোদ্ভবতিমিরপূর্ণে মম মুহুঃ
দরিদ্রাণীকুর্বন্দিনকরসহস্রাণি কিরণৈঃ ।

বিধত্তাং কামাক্ষি প্রসৃমরতমোবঞ্চনচণঃ

ক্ষণার্ধং সান্নিধ্যং চরণমণিদীপো জননি তে ॥ ২৬॥

কবীনাং চেতোবন্নখররুচিসম্পর্কি বিবুধ-

স্রবন্তীস্রোতোবৎপটুমুখরিতং হংসকরবৈঃ ।

দিনারম্ভশ্রীবন্নিযতমরুণচ্ছাযসুভগং

মদন্তঃ কামাক্ষ্যাঃ স্ফুরতু পদপঙ্কেরুহযুগম্ ॥ ২৭॥

সদা কিং সম্পর্কাৎপ্রকৃতিকঠিনৈর্নাকিমুকুটৈঃ

তটৈর্নীহারাদ্রেরধিকমণুনা যোগিমনসা ।

বিভিন্তে সংমোহং শিশিরযতি ভক্তানপি দৃশাম্

অদৃশ্যং কামাক্ষি প্রকটযতি তে পাদযুগলম্ ॥ ২৮॥

পবিত্রাভ্যামম্ব প্রকৃতিমৃদুলাভ্যাং তব শিবে

পদাভ্যাং কামাক্ষি প্রসভমভিভূতৈঃ সচকিতৈঃ ।

প্রবালৈরম্ভোজৈরপি চ বনবাসব্রতদশাঃ

সদৈবারভ্যন্তে পরিচরিতনানাদ্বিজগণৈঃ ॥ ২৯॥

চিরাদ্দৃশ্যা হংসৈঃ কথমপি সদা হংসসুলভং

নিরস্যন্তী জাড্যং নিযতজডমধ্যৈকশরণম্ ।

অদোষব্যাসঙ্গা সততমপি দোষাপ্তিমলিনং

পযোজং কামাক্ষ্যাঃ পরিহসতি পাদাব্জযুগলী ॥ ৩০॥

সুরাণামানন্দপ্রবলনতয়া মণ্ডনতয়া

নখেন্দুজ্যোৎস্নাভির্বিসৃমরতমঃখণ্ডনতয়া ।

পয়োজশ্রীদ্বেষব্রতরততয়া ত্বচ্চরণয়োঃ

বিলাসঃ কামাক্ষি প্রকটয়তি নৈশাকরদশাম্ ॥ ৩১ ॥

সিতিম্না কান্তীনাং নখরজনুষাং পাদনলিন-

চ্ছবীনাং শোণিম্না তব জননি কামাক্ষি নমনে ।

লভন্তে মন্দারগ্রথিতনববন্ধূককুসুম-

স্রজাং সামীচীন্যং সুরপুরপুরন্ধ্রীকচভরাঃ ॥ ৩২ ॥

স্ফুরন্মধ্যে শুদ্ধে নখকিরণদুগ্ধাব্ধিপয়সাং

বহন্নব্জং চক্রং দরমপি চ লেখাত্মকতয়া ।

শ্রিতো মাৎস্যং রূপং শ্রিয়মপি দধানো নিরুপমাং

ত্রিধামা কামাক্ষ্যাঃ পদনলিননামা বিজয়তে ॥ ৩৩॥

নখশ্রীসন্নদ্ধস্তবকনিচিতঃ স্বৈশ্চ কিরণৈঃ

পিশঙ্গৈঃ কামাক্ষি প্রকটিতলসৎপল্লবরুচিঃ ।

সতাং গম্যঃ শঙ্কে সকলফলদাতা সুরতরুঃ

ত্বদীয়ঃ পাদোঽয়ং তুহিনগিরিরাজন্যতনয়ে ॥ ৩৪ ॥

বষট্কুর্বন্মাঞ্জীরকলকলৈঃ কর্মলহরী-

হবীংষি প্রৌদ্দণ্ডং জ্বলতি পরমজ্ঞানদহনে ।

মহীয়ান্কামাক্ষি স্ফুটমহসি জোহোতি সুধিয়াং
মনোবেদ্যাং মাতস্তব চরণযজ্বা গিরিসুতে ॥ ৩৫॥

মহামন্ত্রং কিংচিন্মণিকটকনাদৈর্মৃদু জপন্
ক্ষিপন্দিক্ষু স্বচ্ছং নখরুচিময়ং ভাস্মনরজঃ ।
নতানাং কামাক্ষি প্রকৃতিপটুরচ্চাট্য মমতা-
পিশাচীং পাদোঽয়ং প্রকটয়তি তে মান্ত্রিকদশাম্ ॥ ৩৬॥

উদীতে বোধেন্দৌ তমসি নিতরাং জগ্মুষি দশাং
দরিদ্রাং কামাক্ষি প্রকটমনুরাগং বিদধতী ।
সিতেনাচ্ছাদ্যাঙ্গং নখরুচিপটেনাঙ্ঘ্রিযুগলী-
পুরন্ধ্রী তে মাতঃ স্বয়মভিসরত্যেব হৃদয়ম্ ॥ ৩৭॥

দিনারম্ভঃ সম্পন্নলিনবিপিনানামভিনবো
বিকাসো বাসন্তঃ সুকবিপিকলোকস্য নিয়তঃ ।
প্রদোষঃ কামাক্ষি প্রকটপরমজ্ঞানশশিন-
শ্চকাস্তি ত্বৎপাদস্মরণমহিমা শৈলতনয়ে ॥ ৩৮॥

ধৃতচ্ছায়ং নিত্যং সরসিরুহমৈত্রীপরিচিতং
নিধানং দীপ্তীনাং নিখিলজগতাং বোধজনকম্ ।
মুমুক্ষূণাং মার্গপ্রথনপটু কামাক্ষি পদবীং
পদং তে পাতঙ্গীং পরিকলয়তে পর্বতসুতে ॥ ৩৯॥

শনৈস্তীর্ত্বা মোহাম্বুধিমথ সমারোঢুমনসঃ
ক্রমাৎকৈবল্যাখ্যাং সুকৃতিসুলভাং সৌধবলভীম্ ।
লভন্তে নিঃশ্রেণীমিব ঝটিতি কামাক্ষি চরণং
পুরশ্চর্যাভিস্তে পুরমথনসীমন্তিনি জনাঃ ॥ ৪০॥

প্রচণ্ডার্তিক্ষোভপ্রমথনকৃতে প্রাতিভসরি-
ৎপ্রবাহপ্রোদ্দণ্ডীকরণজলদায প্রণমতাম্ ।
প্রদীপায প্রৌঢে ভবতমসি কামাক্ষি চরণ-
প্রসাদৌন্মুখ্যায স্পৃহযতি জনোঽযং জননি তে ॥ ৪১॥

মরুদ্ভিঃ সংসেব্যা সততমপি চাঞ্চল্যরহিতা
সদারুণ্যং যান্তী পরিণতিদরিদ্রাণসুষমা ।
গুণোৎকর্ষান্মাঞ্জীরককলকলৈস্তর্জনপটুঃ
প্রবালং কামাক্ষ্যাঃ পরিহসতি পাদাব্জযুগলী ॥ ৪২॥

জগদ্রক্ষাদক্ষা জলজরুচিশিক্ষাপটুতরা
সমৈর্নম্যা রম্যা সততমভিগম্যা বুধজনৈঃ ।
দ্বযী লীলালোলা শ্রুতিষু সুরপালাদিমুকুটী-
তটীসীমাধামা তব জননি কামাক্ষি পদযোঃ ॥ ৪৩॥

গিরাং দূরৌ চোরৌ জডিমতিমিরাণাং কৃতজগ-
ৎপরিত্রাণৌ শোণৌ মুনিহৃদযলীলৈকনিপুণৌ ।

নখৈঃ স্মেরৌ সারৌ নিগমবচসাং খণ্ডিতভব-
গ্রহোন্মাদৌ পাদৌ তব জননি কামাক্ষি কলয়ে ॥ ৪৪॥

অবিশ্রান্তং পঙ্কং যদপি কলযন্যাবকমযং
নিরস্যন্কামাক্ষি প্রণমনজুষাং পঙ্কমখিলম্ ।
তুলাকোটিদ্বন্দ্বং দধদপি চ গচ্ছন্নতুলতাং
গিরাং মার্গং পাদো গিরিবরসুতে লঙ্ঘযতি তে ॥ ৪৫॥

প্রবালং সব্রীলং বিপিনবিবরে বেপযতি যা
স্ফুরল্লীলং বালাতপমধিকবালং বদতি যা ।
রুচিং সান্ধ্যাং বন্ধ্যাং বিরচযতি যা বর্ধযতু সা
শিবং মে কামাক্ষ্যাঃ পদনলিনপাটল্যলহরী ॥ ৪৬॥

কিরঞ্জ্যোৎস্নারীতিং নখমুখরুচা হংসমনসাং
বিতন্বানঃ প্রীতিং বিকচতরুণাম্ভোরুহরুচিঃ ।
প্রকাশঃ শ্রীপাদস্তব জননি কামাক্ষি তনুতে
শরৎকালপ্রৌঢিং শশিশকলচূডপ্রিযতমে ॥ ৪৭॥

নখাঙ্কুরস্মেরদ্যুতিবিমলগঙ্গাম্ভসি সুখং
কৃতস্নানং জ্ঞানামৃতমমলমাস্বাদ্য নিযতম্ ।
উদঞ্চন্মঞ্জীরস্ফুরণমণিদীপে মম মনো
মনোজ্ঞে কামাক্ষ্যাশ্চরণমণিহর্ম্যে বিহরতাম্ ॥ ৪৮॥

ভবাম্ভোধৌ নৌকাং জডিমবিপিনে পাবকশিখা-

মমর্ত্যেন্দ্রাদীনামধিমুকুটমুত্তংসকলিকাম্ ।

জগত্তাপে জ্যোৎস্নামকৃতকবচঃপঞ্জরপুটে

শুকস্ত্রীং কামাক্ষ্যা মনসি কলয়ে পাদযুগলীম্ ॥ ৪৯॥

পরত্মপ্রাকাশ্যপ্রতিফলনচুঞ্চুঃ প্রণমতাং

মনোজ্ঞস্ত্বৎপাদো মণিমুকুরমুদ্রাং কলযতে ।

যদীযাং কামাক্ষি প্রকৃতিমসৃণাঃ শোধকদশাং

বিধাতুং চেষ্ঠন্তে বলরিপুবধূটীকচভরাঃ ॥ ৫০॥

অবিশ্রান্তং তিষ্ঠন্নকৃতকবচঃকন্দরপুটী-

কুটীরান্তঃ প্রৌঢং নখরুচিসটালীং প্রকটযন্ ।

প্রচণ্ডং খণ্ডত্বং নযতু মম কামাক্ষি তরসা

তমোবেতণ্ডেন্দ্রং তব চরণকণ্ঠীরবপতিঃ ॥ ৫১॥

পুরস্তাৎকামাক্ষি প্রচুররসমাখণ্ডলপুরী-

পুরন্ধ্রীণাং লাস্যং তব ললিতমালোক্য শনকৈঃ ।

নখশ্রীভিঃ স্মেরা বহু বিতনুতে নূপুররবৈ-

শ্চমৎকৃত্যা শঙ্কে চরণযুগলী চাটুরচনাঃ ॥ ৫২॥

সরোজং নিন্দন্তী নখকিরণকর্পূরশিশিরা

নিষিক্তা মারারের্মুকুটশশিরেখাহিমজলৈঃ ।

স্ফুরন্তী কামাক্ষি স্ফুটরুচিময়ে পল্লবচয়ে

তবাধত্তে মৈত্রীং পথিকসুদৃশা পাদযুগলী ॥ ৫৩॥

নতানাং সম্পত্তেরনবরতমাকর্ষণজপঃ

প্ররোহৎসংসারপ্রসরগরিমস্তম্ভনজপঃ ।

ত্বদীয়ঃ কামাক্ষি স্মরহরমনোমোহনজপঃ

পটীয়ান্নঃ পায়াৎপদনলিনমঞ্জীরনিনদঃ ॥ ৫৪ ॥

বিতন্বীথা নাথে মম শিরসি কামাক্ষি কৃপয়া

পদাম্ভোজন্যাসং পশুপরিবৃঢপ্রাণদয়িতে ।

পিবন্তো যন্মুদ্রাং প্রকটমুপকম্পাপরিসরং

দৃশা নানন্দ্যন্তে নলিনভবনারায়ণমুখাঃ ॥ ৫৫ ॥

প্রণামোদ্যদ্বৃন্দারমুকুটমন্দারকলিকা-

বিলোলল্লোলম্বপ্রকরময়ধূমপ্রচুরিমা ।

প্রদীপ্তঃ পাদাব্জদ্যুতিবিততিপাটল্যলহরী-

কৃশানুঃ কামাক্ষ্যা মম দহতু সংসারবিপিনম্ ॥ ৫৬॥

বলক্ষশ্রীরৃক্ষাধিপশিশুসদৃক্ষৈস্তব নখৈঃ

জিঘৃক্ষুর্দক্ষত্বং সরসিরুহভিক্ষুত্বকরণে ।

ক্ষণান্মে কামাক্ষি ক্ষপিতভবসংক্ষোভগরিমা

বচোবৈচক্ষন্যং চরণযুগলী পক্ষ্মলয়তাত্ ॥ ৫৭॥

সমন্তাৎকামাক্ষি ক্ষততিমিরসন্তানসুভগান্

অনন্তাভির্ভাভির্দিনমনু দিগন্তান্বিরচযন্ ।

অহন্তাযা হন্তা মম জডিমদন্তাবলহরিঃ

বিভিন্তাং সন্তাপং তব চরণচিন্তামণিরসৌ ॥ ৫৮॥

দধানো ভাস্বত্তামমৃতনিলযো লোহিতবপুঃ

বিনম্রাণাং সৌম্যো গুরুরপি কবিত্বং চ কলযন্ ।

গতৌ মন্দো গঙ্গাধরমহিষি কামাক্ষি ভজতাং

তমঃকেতুর্মাতস্তব চরণপদ্মো বিজযতে ॥ ৫৯॥

নযন্তীং দাসত্বং নলিনভবমুখ্যানসুলভ-

প্রদানাদ্দীনানামমরতরুদৌর্ভাগ্যজননীম্ ।

জগজ্জন্মক্ষেমক্ষযবিধিষু কামাক্ষি পদযো-

র্ধুরীণামীষ্টে করস্তব ভণিতুমাহোপুরুষিকাম্ ॥ ৬০॥

জনোঽযং সন্তপ্তো জননি ভবচণ্ডাংশুকিরণৈঃ

অলব্ধ্বৈকং শীতং কণমপি পরজ্ঞানপযসঃ ।

তমোমার্গে পান্থস্তব ঝটিতি কামাক্ষি শিশিরাং

পদাম্ভোজচ্ছাযাং পরমশিবজাযে মৃগযতে ॥ ৬১॥

জযত্যম্ব শ্রীমন্নখকিরণচীনাংশুকমযং

বিতানং বিভ্রাণে সুরমুকুটসংঘট্টমসৃণে ।

নিজারুণ্যক্ষৌমাস্তরণবতি কামাক্ষি সুলভা

বুধৈঃ সংবিন্নারী তব চরণমাণিক্যভবনে ॥ ৬২॥

প্রতীমঃ কামাক্ষি স্ফুরিততরুণাদিত্যকিরণ-

শ্রিয়ো মূলদ্রব্যং তব চরণমদ্রীন্দ্রতনয়ে ।

সুরেন্দ্রাশামাপূরযতি যদসৌ ধ্বান্তমখিলং

ধুনীতে দিগ্ভাগানপি চ মহসা পাটলযতে ॥ ৬৩॥

মহাভাষ্যব্যাখ্যাপটুশযনমারোপযতি বা

স্মরব্যাপারের্ষ্যাপিশুননিটিলং কারযতি বা ।

দ্বিরেফাণামধ্যাসযতি সততং বাধিবসতিং

প্রণম্রান্কামাক্ষ্যাঃ পদনলিনমাহাত্ম্যগরিমা ॥ ৬৪॥

বিবেকাম্ভস্স্রোতস্স্নপনপরিপাটীশিশিরিতে

সমীভূতে শাস্ত্রস্মরণহলসংকর্ষণবশাত্ ।

সতাং চেতঃক্ষেত্রে বপতি তব কামাক্ষি চরণো

মহাসংবিৎসস্যপ্রকরবরবীজং গিরিসুতে ॥ ৬৫॥

দধানো মন্দারস্তবকপরিপাটীং নখরুচা

বহন্দীপ্তাং শোণাঙ্গুলিপটলচাম্পেযকলিকাম্ ।

অশোকোল্লাসং নঃ প্রচুরযতু কামাক্ষি চরণো

বিকাসী বাসন্তঃ সময ইব তে শর্বদযিতে ॥ ৬৬॥

নখাংশুপ্রাচুর্যপ্রসৃমরমরালালিধবলঃ

স্ফুরন্মঞ্জীরোদ্যন্মরকতমহশ্শৈবলযুতঃ ।

ভবত্যাঃ কামাক্ষি স্ফুটচরণপাটল্যকপটো

নদঃ শোণাভিখ্যো নগপতিতনূজে বিজযতে ॥ ৬৭॥

ধুনানং পঙ্কৌঘং পরমসুলভং কণ্টককুলৈঃ

বিকাসব্যাসঙ্গং বিদধদপরাধীনমনিশম্ ।

নখেন্দুজ্যোৎস্নাভির্বিশদরুচি কামাক্ষি নিতরাম্

অসামান্যং মন্যে সরসিজমিদং তে পদযুগম্ ॥ ৬৮॥

করীন্দ্রায দ্রুহ্যত্যলসগতিলীলাসু বিমলৈঃ

পযোজৈর্মাৎসর্যং প্রকটযতি কামং কলযতে ।

পদাম্ভোজদ্বন্দ্বং তব তদপি কামাক্ষি হৃদযং

মুনীনাং শান্তানাং কথমনিশমস্মৈ স্পৃহযতে ॥ ৬৯॥

নিরস্তা শোণিম্না চরণকিরণানাং তব শিবে

সমিন্ধানা সন্ধ্যারুচিরচলরাজন্যতনযে ।

অসামর্থ্যাদেনং পরিভবিতুমেতৎসমরুচাং

সরোজানাং জানে মুকুলযতি শোভাং প্রতিদিনম্ ॥ ৭০॥

উপাদিক্ষদ্দাক্ষ্যং তব চরণনামা গুরুরসৌ

মরালানাং শঙ্কে মসৃণগতিলালিত্যসরণৌ ।

অতস্তে নিস্তন্দ্রং নিযতমমুনা সখ্যপদবীং

প্রপন্নং পাথোজং প্রতি দধতি কামাক্ষি কুতুকম্ ॥ ৭১॥

দধানৈঃ সংসর্গং প্রকৃতিমলিনৈঃ ষটপদকুলৈঃ

দ্বিজাধীশশ্লাঘাবিধিষু বিদধদ্ভির্মুকুলতাম্ ।

রজোমিশ্রৈঃ পদ্মৈর্নিযতমপি কামাক্ষি পদযোঃ

বিরোধস্তে যুক্তো বিষমশরবৈরিপ্রিযতমে ॥ ৭২॥

কবিত্বশ্রীমিশ্রীকরণনিপুণৌ রক্ষণচণৌ

বিপন্নানাং শ্রীমন্নলিনমসৃণৌ শোণকিরণৌ ।

মুনীন্দ্রাণামন্তঃকরণশরণৌ মন্দসরণৌ

মনোজ্ঞৌ কামাক্ষ্যা দুরিতহরণৌ নৌমি চরণৌ ॥ ৭৩॥

পরস্মাৎসর্বস্মাদপি চ পরযোর্মুক্তিকরযোঃ

নখশ্রীভির্জ্যোৎস্নাকলিততুলযোস্তাম্রতলযোঃ ।

নিলীযে কামাক্ষ্যা নিগমনুতযোর্নাকিনতযোঃ

নিরস্তপ্রোন্মীলন্নলিনমদযোরেব পদযোঃ ॥ ৭৪॥

স্বভাবাদন্যোন্যং কিসলযমপীদং তব পদং

ম্রদিম্না শোণিম্না ভগবতি দধাতে সদৃশতাম্ ।

বনে পূর্বস্যেচ্ছা সততমবনে কিং তু জগতাং

পরস্যেত্থং ভেদঃ স্ফুরতি হৃদি কামাক্ষি সুধিযাম্ ॥ ৭৫॥

কথং বাচালোঽপি প্রকটমণিমঞ্জীরনিনদৈঃ

সদৈবানন্দার্দ্রান্বিরচযতি বাচংযমজনান্ ।

প্রকৃত্যা তে শোণচ্ছবিরপি চ কামাক্ষি চরণো

মনীষানৈর্মল্যং কথমিব নৃণাং মাংসলযতে ॥ ৭৬॥

চলত্তৃষ্ণাবীচীপরিচলনপর্যাকুলতযা

মুহুর্ভ্রান্তস্তান্তঃ পরমশিববামাক্ষি পরবান্ ।

তিতীর্ষুঃ কামাক্ষি প্রচুরতরকর্মাম্বুধিমমুং

কদাহং লপ্স্যে তে চরণমণিসেতুং গিরিসুতে ॥ ৭৭॥

বিশুষ্যন্ত্যাং প্রজ্ঞাসরিতি দুরিতগ্রীষ্মসময-

প্রভাবেণ ক্ষীণে সতি মম মনঃকেকিনি শুচা ।

ত্বদীযঃ কামাক্ষি স্ফুরিতচরণাম্ভোদমহিমা

নভোমাসাটোপং নগপতিসুতে কিং ন কুরুতে ॥ ৭৮॥

বিনম্রাণাং চেতোভবনবলভীসীম্নি চরণ-

প্রদীপে প্রাকাশ্যং দধতি তব নির্ধূততমসি ।

অসীমা কামাক্ষি স্বযমলঘুদুষ্কর্মলহরী

বিঘূর্ণন্তী শান্তিং শলভপরিপাটীব ভজতে ॥ ৭৯॥

বিরাজন্তী শুক্তির্নখকিরণমুক্তামণিততেঃ

বিপৎপাথোরাশৌ তরিরপি নরাণাং প্রণমতাম্ ।

ত্বদীয়ঃ কামাক্ষি ধ্রুবমলঘুবহ্নির্ভববনে
মুনীনাং জ্ঞানাগ্নেররণিরয়মঙ্ঘ্রির্বিজয়তে ॥ ৮০॥

সমস্তৈঃ সংসেব্যঃ সততমপি কামাক্ষি বিবুধৈঃ
স্তুতো গন্ধর্বস্ত্রীসুললিতবিপঞ্চীকলরবৈঃ ।
ভবত্যা ভিন্দানো ভবগিরিকুলং জৃম্ভিততমো-
বলদ্রোহী মাতশ্চরণপুরুহূতো বিজয়তে ॥ ৮১॥

বসন্তং ভক্তানামপি মনসি নিত্যং পরিলসদ্-
ঘনচ্ছায়াপূর্ণং শুচিমপি নৃণাং তাপশমনম্ ।
নখেন্দুজ্যোৎস্নাভিঃ শিশিরমপি পদ্মোদয়করং
নমামঃ কামাক্ষ্যাশ্চরণমধিকাশ্চর্যকরণম্ ॥ ৮২॥

কবীন্দ্রাণাং নানাভণিতিগুণচিত্রীকৃতবচঃ-
প্রপঞ্চব্যাপারপ্রকটনকলাকৌশলনিধিঃ ।
অধঃকুর্বন্নব্জং সনকভৃগুমুখ্যৈর্মুনিজনৈঃ
নমস্যঃ কামাক্ষ্যাশ্চরণপরমেষ্ঠী বিজয়তে ॥ ৮৩॥

ভবত্যাঃ কামাক্ষি স্ফুরিতপদপঙ্কেরুহভুবাং
পরাগাণাং পূরৈঃ পরিহৃতকলঙ্কব্যতিকরৈঃ ।
নতানামামৃষ্টে হৃদয়মুকুরে নির্মলরুচি
প্রসন্নে নিশ্শেষং প্রতিফলতি বিশ্বং গিরিসুতে ॥ ৮৪॥

তব ত্রস্তং পাদাৎকিসলযমরণ্যান্তরমগাত্

পরং রেখারূপং কমলমমুমেবাশ্রিতমভূত্ ।

জিতানাং কামাক্ষি দ্বিতযমপি যুক্তং পরিভবে

বিদেশে বাসো বা শরণগমনং বা নিজরিপোঃ ॥ ৮৫॥

গৃহীত্বা যাথার্থ্যং নিগমবচসাং দেশিককৃপা-

কটাক্ষর্কজ্যোতিশ্শমিতমমতাবন্ধতমসঃ ।

যতন্তে কামাক্ষি প্রতিদিবসমন্তর্দ্রঢযিতুং

ত্বদীযং পাদাব্জং সুকৃতপরিপাকেন সুজনাঃ ॥ ৮৬॥

জডানামপ্যম্ব স্মরণসমযে তবচ্চরণযোঃ

ভ্রমন্মন্থক্ষ্মাভৃদ্ধুমুঘুমিতসিন্ধুপ্রতিভটাঃ ।

প্রসন্নাঃ কামাক্ষি প্রসভমধরস্পন্দনকরা

ভবন্তি স্বচ্ছন্দং প্রকৃতিপরিপক্কা ভণিতযঃ ॥ ৮৭॥

বহন্নপ্যশ্রান্তং মধুরনিনদং হংসকমসৌ

তমেবাধঃ কর্তুং কিমিব যততে কেলিগমনে ।

ভবস্যৈবানন্দং বিদধদপি কামাক্ষি চরণো

ভবত্যাস্তদ্দ্রোহং ভগবতি কিমেবং বিতনুতে ॥ ৮৮॥

যদত্যন্তং তাম্যত্যলসগতিবার্তাস্বপি শিবে

তদেতৎকামাক্ষি প্রকৃতিমৃদুলং তে পদযুগম্ ।

কিরীটৈঃ সংঘট্টং কথমিব সুরৌঘস্য সহতে

মুনীন্দ্রাণামান্তে মনসি চ কথং সূচিনিশিতে ॥ ৮৯॥

মনোরঙ্গে মৎেক বিবুধজনসংমোদজননী

সরাগব্যাসঙ্গং সরসমৃদুসংচারসুভগা ।

মনোজ্ঞা কামাক্ষি প্রকটযতু লাস্যপ্রকরণং

রণন্মঞ্জীরা তে চরণযুগলীনর্তকবধূঃ ॥ ৯০॥

পরিষ্কুর্বন্মাতঃ পশুপতিকপর্দং চরণরাট্

পরাচাং হৃৎপদ্মং পরমভণিতীনাং চ মকুটম্ ।

ভবাখ্যে পাথোধৌ পরিহরতু কামাক্ষি মমতা-

পরাধীনত্বং মে পরিমুষিতপাথোজমহিমা ॥ ৯১॥

প্রসূনৈঃ সম্পর্কাদমরতরুণীকুন্তলভবৈঃ

অভীষ্টানাং দানাদনিশমপি কামাক্ষি নমতাম্ ।

স্বসঙ্গাৎকঙ্কেলিপ্রসবজনকত্বেন চ শিবে

ত্রিধা ধত্তে বার্তাং সুরভিরিতি পাদো গিরিসুতে ॥ ৯২॥

মহামোহস্তেনব্যতিকরভযাৎপালযতি যো

বিনিক্ষিপ্তং স্বস্মিন্নিজজনমনোরত্নমনিশম্ ।

স রাগস্যোদ্রেকাৎসততমপি কামাক্ষি তরসা

কিমেবং পাদোঽসৌ কিসলযরুচিং চোরযতি তে ॥ ৯৩॥

সদা স্বাদুংকারং বিষযলহরীশালিকণিকাং

সমাস্বাদ্য শ্রান্তং হৃদযশুকপোতং জননি মে ।

কৃপাজালে ফালেক্ষণমহিষি কামাক্ষি রভসাত্

গৃহীত্বা রুন্ধীথারস্তব পদযুগীপঞ্জরপুটে ॥ ৯৪ ॥

ধুনানং কামাক্ষি স্মরণলবমাত্রেণ জডিম-

জ্বরপ্রৌঢিং গূঢস্থিতি নিগমনৈকুঞ্জকুহরে ।

অলভ্যং সর্বেষাং কতিচন লভন্তে সুকৃতিনঃ

চিরাদন্বিষ্যন্তস্তব চরণসিদ্ধৌষধমিদম্ ॥ ৯৫ ॥

রণন্মঞ্জীরাভ্যাং ললিতগমনাভ্যাং সুকৃতিনাং

মনোবাস্তব্যাভ্যাং মথিততিমিরাভ্যাং নখরুচা ।

নিধেযাভ্যাং পত্যা নিজশিরসি কামাক্ষি সততং

নমস্তে পাদাভ্যাং নলিনমৃদুলাভ্যাং গিরিসুতে ॥ ৯৬ ॥

সুরাগে রাকেন্দুপ্রতিনিধিমুখে পর্বতসুতে

চিরাল্লভ্যে ভক্ত্যা শমধনজনানাং পরিষদা ।

মনোভৃঙ্গো মৎকঃ পদকমলযুগ্মে জননি তে

প্রকামং কামাক্ষি ত্রিপুরহরবামাক্ষি রমতাম্ ॥ ৯৭ ॥

শিবে সংবিদ্রূপে শশিশকলচূডপ্রিযতমে

শনৈর্গত্যাগত্যা জিতসুরবরেভে গিরিসুতে ।

যতন্তে সন্তস্তে চরণনলিনালানযুগলে
সদা বদ্ধং চিত্তপ্রমদকরিযূথং দৃঢতরম্ ॥ ৯৮॥

যশঃ সূতে মাতর্মধুরকবিতাং পক্ষ্মলযতে
শ্রিযং দত্তে চিত্তে কমপি পরিপাকং প্রথযতে ।
সতাং পাশগ্রন্থিং শিথিলযতি কিং কিং ন কুরুতে
প্রপন্নে কামাক্ষ্যাঃ প্রণতিপরিপাটী চরণযোঃ ॥ ৯৯॥

মনীষাং মাহেন্দ্রীং ককুভমিব তে কামপি দশাং
প্রধত্তে কামাক্ষ্যাশ্চরণতরুণাদিত্যকিরণঃ ।
যদীযে সম্পর্কে ধৃতরসমরন্দা কবযতাং
পরীপাকং ধত্তে পরিমলবতী সূক্তিনলিনী ॥ ১০০॥

পুরা মারারাতিঃ পুরমজযদম্ব স্তবশতৈঃ
প্রসন্নাযাং সত্যাং ত্বযি তুহিনশৈলেন্দ্রতনযে ।
অতস্তে কামাক্ষি স্ফুরতু তরসা কালসমযে
সমাযাতে মাতর্মম মনসি পাদাব্জযুগলম্ ॥ ১০১॥

পদদ্বন্দ্বং মন্দং গতিষু নিবসন্তং হৃদি সতাং
গিরামন্তে ভ্রান্তং কৃতকরহিতানাং পরিবৃঢে ।
জনানামানন্দং জননি জনযন্তং প্রণমতাং
ত্বদীযং কামাক্ষি প্রতিদিনমহং নৌমি বিমলম্ ॥ ১০২॥

ইদং যঃ কামাক্ষ্যাশ্চরণনলিনস্তোত্রশতকং

জপেন্নিত্যং ভক্ত্যা নিখিলজগদাহ্লাদজনকম্ ।

স বিশ্বেষাং বন্দ্যঃ সকলকবিলোকৈকতিলকঃ

চিরং ভুক্ত্বা ভোগান্পরিণমতি চিদ্রূপকলযা ॥ ১০৩॥

{পাদারবিন্দশতকং সম্পূর্ণম্ ॥}

{॥ স্তুতিশতকম্ ॥}

পাণ্ডিত্যং পরমেশ্বরি স্তুতিবিধৌ নৈবাশ্রযন্তে গিরাং

বৈরিঞ্চান্যপি গুম্ফনানি বিগলদ্গর্বাণি শর্বাণি তে ।

স্তোতুং ত্বাং পরিফুল্লনীলনলিনশ্যামাক্ষি কামাক্ষি মাং

বাচালীকুরুতে তথাপি নিতরাং ত্বৎপাদসেবাদরঃ ॥ ১॥

তাপিঞ্ছস্তবকত্বিষে তনুভৃতাং দারিদ্র্যমুদ্রাদ্বিষে

সংসারাখ্যতমোমুষে পুররিপোর্বামাঙ্কসীমাজুষে ।

কম্পাতীরমুপেযুষে কবযতাং জিহ্বাকুটীং জগ্মুষে

বিশ্বত্রাণপুষে নমোঽস্তু সততং তস্মৈ পরংজ্যোতিষে ॥ ২॥

যে সন্ধ্যারুণযন্তি শংকরজটাকান্তারচন্দ্রার্ভকং

সিন্দূরন্তি চ যে পুরন্দরবধূসীমন্তসীমান্তরে ।

পুণ্যং যে পরিপক্কয়ন্তি ভজতাং কাঞ্চীপুরে মামমী
পাযাসুঃ পরমেশ্বরপ্রণযিনীপাদোদ্ভবাঃ পাংসবঃ ॥ ৩॥

কামাডম্বরপূরযা শশিরুচা কম্রস্মিতানাং ত্বিষা
কামারেরনুরাগসিন্ধুমধিকং কল্লোলিতং তন্বতী।
কামাক্ষীতি সমস্তসজ্জননুতা কল্যাণদাত্রী নৃণাং
কারুণ্যাকুলমানসা ভগবতী কম্পাতটে জৃম্ভতে ॥ ৪ ॥

কামাক্ষীণপরাক্রমপ্রকটনং সম্ভাবযন্তী দৃশা
শ্যামা ক্ষীরসহোদরস্মিতরুচিপ্রক্ষালিতাশান্তরা।
কামাক্ষীজনমৌলিভূষণমণির্বাচাং পরা দেবতা
কামাক্ষীতি বিভাতি কাপি করুণা কম্পাতটিন্যাস্তটে ॥ ৫॥

শ্যামা কাচন চন্দ্রিকা ত্রিভুবনে পুণ্যাত্মনামাননে
সীমাশূন্যকবিত্ববর্ষজননী যা কাপি কাদম্বিনী।
মারারাতিমনোবিমোহনবিধৌ কাচিত্তমঃকন্দলী
কামাক্ষ্যাঃ করুণাকটাক্ষলহরী কামায মে কল্পতাম্ ॥ ৬॥

প্রৌঢধ্বান্তকদম্বকে কুমুদিনীপুণ্যাংকুরং দর্শযন্
জ্যোৎস্নাসংগমনেঽপি কোকমিথুনং মিশ্রং সমুদ্ভাবযন্।
কালিন্দীলহরীদশাং প্রকটযন্কম্রাং নভস্যদ্ভুতাং
কশ্চিন্নেত্রমহোৎসবো বিজযতে কাঞ্চীপুরে শূলিনঃ ॥ ৭॥

তন্দ্রাহীনতমালনীলসুষমৈস্তারুণ্যলীলাগৃহৈঃ

তারানাথকিশোরলাঞ্ছিতকচৈস্তাম্রারবিন্দেক্ষণৈঃ ।

মাতঃ সংশ্রয়তাং মনো মনসিজপ্রাগল্ভ্যনাড়িন্ধমৈঃ

কম্পাতীরচরৈর্ঘনস্তনভরৈঃ পুণ্যাঙ্কুরৈঃ শাংকরৈঃ ॥ ৮॥

নিত্যং নিশ্চলতামুপেত্য মরুতাং রক্ষাবিধিং পুষ্ণতী

তেজস্সংচযপাটবেন কিরণানুষ্ণদ্যুতের্মুষ্ণতী ।

কাঞ্চীমধ্যগতাপি দীপ্তিজননী বিশ্বান্তরে জৃম্ভতে

কাচিচ্চিত্রমহো স্মৃতাপি তমসাং নির্বাপিকা দীপিকা ॥ ৯॥

কান্তৈঃ কেশরুচাং চযৈর্ভ্রমরিতং মন্দস্মিতৈঃ পুষ্পিতং

কান্ত্যা পল্লবিতং পদাম্বুরুহযোর্নেত্রত্বিষা পত্রিতম্ ।

কম্পাতীরবনান্তরং বিদধতী কল্যাণজন্মস্থলী

কাঞ্চীমধ্যমহামণির্বিজযতে কাচিৎকৃপাকন্দলী ॥ ১০॥

রাকাচন্দ্রসমানকান্তিবদনা নাকাধিরাজস্তুতা

মূকানামপি কুর্বতী সুরধুনীনীকাশবাগ্বৈভবম্ ।

শ্রীকাঞ্চীনগরীবিহাররসিকা শোকাপহন্ত্রী সতাম্

একা পুণ্যপরম্পরা পশুপতেরাকারিণী রাজতে ॥ ১১॥

জাতা শীতলশৈলতঃ সুকৃতিনাং দৃশ্যা পরং দেহিনাং

লোকানাং ক্ষণমাত্রসংস্মরণতঃ সন্তাপবিচ্ছেদিনী ।

আশ্চর্যং বহু খেলনং বিতনুতে নৈশ্চল্যমাবিভ্রতী
কম্পায়াস্তটসীম্নি কাপি তটিনী কারুণ্যপাথোময়ী ॥ ১২॥

ঐক্যং যেন বিরচ্যতে হরতনৌ দম্ভাবপুম্ভাবুকে
রেখা যৎকচসীম্নি শেখরদশাং নৈশাকরী গাহতে ।
ঔন্নত্যং মুহুরেতি যেন স মহান্মেনাসখঃ সানুমান্
কম্পাতীরবিহারিণা সশরণাস্তেনৈব ধাম্না বয়ম্ ॥ ১৩॥

অক্ষ্ণোশ্চ স্তনয়োঃ শ্রিয়া শ্রবণয়োর্বাহ্বোশ্চ মূলং স্পৃশন্
উত্তংসেন মুখেন চ প্রতিদিনং দ্রুহ্যন্পয়োজন্মনে ।
মাধুর্যেণ গিরাং গতেন মৃদুনা হংসাঙ্গনাং হ্রেপয়ন্
কাঞ্চীসীম্নি চকাস্তি কোঽপি কবিতাসন্তানবীজাঙ্কুরঃ ॥ ১৪॥

খণ্ডং চান্দ্রমসং বতংসমনিশং কাঞ্চীপুরে খেলনং
কালায়শ্ছবিতস্করীং তনুরুচিং কর্ণজপে লোচনে ।
তারুণ্যোষ্মনখম্পচং স্তনভরং জঙ্ঘাস্পৃশং কুন্তলং
ভাগ্যং দেশিকসংচিতং মম কদা সম্পাদয়েদম্বিকে ॥ ১৫॥

তন্বানং নিজকেলিসৌধসরণিং নৈসর্গিকীণাং গিরাং
কেদারং কবিমল্লসূক্তিলহরীসস্যশ্রিয়াং শাশ্বতম্ ।
অংহোবঞ্চনচুঞ্চু কিংচন ভজে কাঞ্চীপুরীমণ্ডনং
পর্যায়চ্ছবি পাকশাসনমণেঃ পৌষ্পেষবং পৌরুষম্ ॥ ১৬॥

আলোকে মুখপঙ্কজে চ দধতী সৌধাকরীং চাতুরীং
চূডালংক্রিযমাণপঙ্কজবনীবৈরাগমপ্রক্রিযা ।
মুগ্ধস্মেরমুখী ঘনস্তনতটীমূর্চ্ছালমধ্যাঞ্চিতা
কাঞ্চীসীমনি কামিনী বিজযতে কাচিজ্জগন্মোহিনী ॥ ১৭॥

যস্মিন্নম্ব ভবৎকটাক্ষরজনী মন্দেঽপি মন্দস্মিত-
জ্যোৎস্নাসংস্নপিতা ভবত্যভিমুখী তং প্রত্যহো দেহিনম্ ।
দ্রক্ষামাক্ষিকমাধুরীমদভরব্রীডাকরী বৈখরী
কামাক্ষি স্বযমাতনোত্যভিসৃতিং বামেক্ষণেব ক্ষণম্ ॥ ১৮॥

কালিন্দীজলকান্তযঃ স্মিতরুচিস্বর্বাহিনীপাথসি
প্রৌঢধ্বান্তরুচঃ স্ফুটাধরমহোলৌহিত্যসন্ধ্যোদযে ।
মণিক্যোপলকুণ্ডলাংশুশিখিনি ব্যামিশ্রধূমশ্রিযঃ
কল্যাণৈকভুবঃ কটাক্ষসুষমাঃ কামাক্ষি রাজন্তি তে ॥ ১৯॥

কলকলরণৎকাঞ্চী কাঞ্চীবিভূষণমালিকা
কচভরলসচ্চন্দ্রা চন্দ্রাবতংসসধর্মিণী ।
কবিকুলগিরঃ শ্রাবংশ্রাবং মিলৎপুলকাংকুরা
বিরচিতশিরঃকম্পা কম্পাতটে পরিশোভতে ॥ ২০॥

সরসবচসাং বীচী নীচীভবন্মধুমাধুরী
ভরিতভুবনা কীর্তিমূর্তির্মনোভবজিত্বরী ।

জননি মনসো যোগ্যং ভোগ্যং নৃণাং তব জাযতে
কথমিব বিনা কাঞ্চীভূষে কটাক্ষতরঙ্গিতম্ ॥ ২১॥

ভ্রমরিতসরিৎকূলো নীলোৎপলপ্রভযাঽঽভযা
নতজনতমঃখণ্ডী তুণ্ডীরসীম্নি বিজৃম্ভতে ।
অচলতপসামেকঃ পাকঃ প্রসূনশরাসন-
প্রতিভটমনোহারী নারীকুলৈকশিখামণিঃ ॥ ২২॥

মধুরবচসো মন্দস্মেরা মতঙ্গজগামিনঃ
তরুণিমজুষস্তাপিচ্ছাভাস্তমঃপরিপন্থিনঃ ।
কুচভরনতাঃ কুর্যুর্ভদ্রং কুরঙ্গবিলোচনাঃ
কলিতকরুণাঃ কাঞ্চীভাজঃ কপালিমহোৎসবাঃ ॥ ২৩॥

কমলসুষমাক্ষ্যারোহে বিচক্ষণবীক্ষণাঃ
কুমুদসুকৃতক্রীডাচূডালকুন্তলবন্ধুরাঃ ।
রুচিররুচিভিস্তাপিচ্ছশ্রীপ্রপঞ্চনচুঞ্চবঃ
পুরবিজযিনঃ কম্পাতীরে স্ফুরন্তি মনোরথাঃ ॥ ২৪॥

কলিতরতযঃ কাঞ্চীলীলাবিধৌ কবিমণ্ডলী-
বচনলহরীবাসন্তীনাং বসন্তবিভূতযঃ ।
কুশলবিধযে ভূযাসুর্মে কুরঙ্গবিলোচনাঃ
কুসুমবিশিখারাতেরক্ষ্ণাং কুতূহলবিভ্রমাঃ ॥ ২৫॥

কবলিততমস্কাণ্ডাস্তুণ্ডীরমণ্ডলমণ্ডনাঃ

সরসিজবনীসন্তানানামরুন্তুদশেখরাঃ ।

নয়নসরণের্নেদীয়ংসঃ কদা নু ভবন্তি মে

তরুণজলদশ্যামাঃ শম্ভোস্তপঃফলবিভ্রমাঃ ॥ ২৬॥

অচরমমিষুং দীনং মীনধ্বজস্য মুখশ্রিয়া

সরসিজভুবো যানং ম্লানং গতেন চ মঞ্জুনা ।

ত্রিদশসদসামন্নং খিন্নং গিরা চ বিতন্বতী

তিলকয়তি সা কম্পাতীরং ত্রিলোচনসুন্দরী ॥ ২৭॥

জননি ভুবনে চঙ্ক্রম্যেঽহং কিয়ন্তমনেহসং

কুপুরুষকরভ্রষ্টৈর্দুষ্টৈর্ধনৈরুদরম্ভরিঃ ।

তরুণকরুণে তন্দ্রাশূন্যে তরঙ্গয় লোচনে

নমতি ময়ি তে কিংচিৎকাঞ্চীপুরীমণিদীপিকে ॥ ২৮॥

মুনিজনমনঃপেটীরত্নং স্ফুরৎকরুণানটী-

বিহরণকলাগেহং কাঞ্চীপুরীমণিভূষণম্ ।

জগতি মহতো মোহব্যাধের্নৃণাং পরমৌষধং

পুরহরদৃশাং সাফল্যং মে পুরঃ পরিজৃম্ভতাম্ ॥ ২৯॥

মুনিজনমোধাম্নে ধাম্নে বচোময়জাহ্নবী-

হিমগিরিতটপ্রাগ্ভারায়াক্ষরায় পরাত্মনে ।

বিহরণজুষে কাঞ্চীদেশে মহেশ্বরলোচন-

ত্রিতযসরসক্রীডাসৌধাঙ্গণায নমো নমঃ ॥ ৩০॥

মরকতরুচাং প্রত্যাদেশং মহেশ্বরচক্ষুষাম্

অমৃতলহরীপূরং পারং ভবাখ্যপযোনিধেঃ ।

সুচরিতফলং কাঞ্চীভাজো জনস্য পচেলিমং

হিমশিখরিণো বংশস্যৈকং বতংসমুপাস্মহে ॥ ৩১॥

প্রণমনদিনারম্ভে কম্পানদীসখি তাবকে

সরসকবিতোন্মেষঃ পূষা সতাং সমুদঞ্চিতঃ ।

প্রতিভটমহাপ্রৌঢপ্রোদ্যৎকবিত্বকুমুদ্বতীং

নযতি তরসা নিদ্রামুদ্রাং নগেশ্বরকন্যকে ॥ ৩২॥

শমিতজডিমারম্ভা কম্পাতটীনিকটেচরী

নিহতদুরিতস্তোমা সোমার্ধমুদ্রিতকুন্তলা ।

ফলিতসুমনোবাঞ্ছা পাঞ্চাযুধী পরদেবতা

সফলযতু মে নেত্রে গোত্রেশ্বরপ্রিযনন্দিনী ॥ ৩৩॥

মম তু ধিষণা পীড্যা জাড্যাতিরেক কথং ত্বযা

কুমুদসুষমামৈত্রীপাত্রীবতংসিতকুন্তলাম্ ।

জগতি শমিতস্তম্ভাং কম্পানদীনিলযামসৌ

শ্রিযতি হি গলত্তন্দ্রা চন্দ্রাবতংসসধর্মিণীম্ ॥ ৩৪॥

পরিমলপরীপাকোদ্রেকং পয়োমুচি কাঞ্চনে

শিখরিণি পুনর্দ্বৈধীভাবং শশিন্যরুণাতপম্ ।

অপি চ জনয়ন্কম্বোর্লক্ষ্মীমনম্বুনি কোঽপ্যসৌ

কুসুমধনুষঃ কাঞ্চীদেশে চকাস্তি পরাক্রমঃ ॥ ৩৫॥

পুরদময়িতুর্বামোৎসঙ্গস্থলেন রসজ্ঞয়া

সরসকবিতাভাজা কাঞ্চীপুরোদরসীময়া ।

তটপরিসরৈর্নীহারাদ্রের্বচোভিরকৃত্রিমৈঃ

কিমিব ন তুলামস্মচ্চেতো মহেশ্বরি গাহতে ॥ ৩৬॥

নয়নযুগলীমাস্মাকীনাং কদা নু ফলেগ্রহীং

বিদধতি গতৌ ব্যাকুর্বাণা গজেন্দ্রচমৎক্রিয়াম্ ।

মরতকরুচো মাহেশানা ঘনস্তননম্রিতাঃ

সুকৃতবিভবাঃ প্রাঞ্চঃ কাঞ্চীবতংসধুরন্ধরাঃ ॥ ৩৭॥

মনসিজযশঃপারম্পর্যং মরন্দঝরীসুবাং

কবিকুলগিরাং কন্দং কম্পানদীতটমণ্ডনম্ ।

মধুরললিতং মৎকং চক্ষুর্মনীষিমনোহরং

পুরবিজয়িনঃ সর্বস্বং তৎপুরস্কুরুতে কদা ॥ ৩৮॥

শিথিলিততমোলীলাং নীলারবিন্দবিলোচনাং

দহনবিলসৎফালাং শ্রীকামকোটিমুপাস্মহে ।

করধৃতসচ্ছূলাং কালারিচিত্তহরাং পরাং
মনসিজকৃপালীলাং লোলালকামলিকেক্ষণাম্ ॥ ৩৯॥

কলালীলাশালা কবিকুলবচঃকৈরববনী-
শরজ্জ্যোৎস্নাধারা শশধরশিশুশ্লাঘ্যমুকুটী ।
পুনীতে নঃ কম্পাপুলিনতটসৌহার্দতরলা
কদা চক্ষুর্মার্গং কনকগিরিধানুষ্কমহিষী ॥ ৪০॥

নমঃ স্তান্নম্রেভ্যঃ স্তনগরিমগর্বেণ গুরুণা
দধানেভ্যশ্চূডাভরণমমৃতস্যন্দি শিশিরম্ ।
সদা বাস্তবেভ্যঃ সুবিধভুবি কম্পাখ্যসরিতে
যশোব্যাপারেভ্যঃ সুকৃতবিভবেভ্যো রতিপতেঃ ॥ ৪১॥

অসূযন্তী কাচিন্মরকতরুচো নাকিমুকুটী-
কদম্বং চুম্বন্তী চরণনখচন্দ্রাংশুপটলৈঃ ।
তমোমুদ্রাং বিদ্রাবযতু মম কাঞ্চীর্নিলযনা
হরোৎসঙ্গশ্রীমন্মণিগৃহমহাদীপকলিকা ॥ ৪২॥

অনাদ্যন্তা কাচিৎসুজননযনানন্দজননী
নিরুন্ধানা কান্তিং নিজরুচিবিলাসৈর্জলমুচাম্ ।
স্মরারেস্তারল্যং মনসি জনযন্তী স্বযমহো
গলৎকম্পা শম্পা পরিলসতি কম্পাপরিসরে ॥ ৪৩॥

সুধাডিণ্ডীরশ্রীঃ স্মিতরুচিষু তুণ্ডীরবিষযং
পরিষ্কুর্বাণাসৌ পরিহসিতনীলোৎপলরুচিঃ ।
স্তনাভ্যামানম্রা স্তবকযতু মে কাঙ্ক্ষিততরুং
দৃশামৈশানীনাং সুকৃতফলপাণ্ডিত্যগরিমা ॥ ৪৪॥

কৃপাধারাদ্রোণী কৃপণধিষণানাং প্রণমতাং
নিহন্ত্রী সন্তাপং নিগমমুকুটোত্তংসকলিকা ।
পরা কাঞ্চীলীলাপরিচযবতী পর্বতসুতা
গিরাং নীবী দেবী গিরিশপরতন্ত্রা বিজযতে ॥ ৪৫॥

কবিত্বশ্রীকন্দঃ সুকৃতপরিপাটী হিমগিরেঃ
বিধাত্রী বিশ্বেষাং বিষমশরবীরধ্বজপটী ।
সখী কম্পানদ্যাঃ পদহসিতপাথোজযুগলী
পুরাণো পাযান্নঃ পুরমথনসাম্রাজ্যপদবী ॥ ৪৬॥

দরিদ্রাণা মধ্যে দরদলিততাপিচ্ছসুষমাঃ
স্তনাভোগক্লান্তাস্তরুণহরিণাঙ্কাঙ্কিতকচাঃ ।
হরাধীনা নানাবিবুধমুকুটীচুম্বিতপদাঃ
কদা কম্পাতীরে কথয বিহরামো গিরিসুতে ॥ ৪৭॥

বরীবর্তু স্থেমা ত্বযি মম গিরাং দেবি মনসো
নরীনর্তু প্রৌঢা বদনকমলে বাক্যলহরী ।

চরীচর্তু প্রজ্ঞাজননি জডিমানঃ পরজনে
সরীসর্তু স্বৈরং জননি ময়ি কামাক্ষি করুণা ॥ ৪৮॥

ক্ষণাত্তে কামাক্ষি ভ্রমরসুষমাশিক্ষণগুরুঃ
কটাক্ষব্যাক্ষেপো মম ভবতু মোক্ষায বিপদাম্ ।
নরীনর্তু স্বৈরং বচনলহরী নির্জরপুরী-
সরিদ্বীচীনীচীকরণপটুরাস্যে মম সদা ॥ ৪৯॥

পুরস্তান্মে ভূযঃপ্রশমনপরঃ স্তান্মম রুজাং
প্রচারস্তে কম্পাতটবিহৃতিসম্পাদিনি দৃশোঃ ।
ইমাং যাচ্ঞামূরীকুরু সপদি দূরীকুরু তমঃ-
পরীপাকং মৎকং সপদি বুধলোকং চ নয মাম্ ॥ ৫০॥

উদঞ্চন্তী কাঞ্চীনগরনিলযে ত্বৎকরুণযা
সমৃদ্ধা বাগ্ধাটী পরিহসিতমাধ্বী কবযতাম্ ।
উপাদত্তে মারপ্রতিভটজটাজূটমুকুটী-
কুটীরোল্লাসিন্যাঃ শতমখতটিন্যা জযপটীম্ ॥ ৫১॥

শ্রিযং বিদ্যাং দদ্যাজ্জননি নমতাং কীর্তিমমিতাং
সুপুত্রান্ প্রাদত্তে তব ঝটিতি কামাক্ষি করুণা ।
ত্রিলোক্যামাধিক্যং ত্রিপুরপরিপন্থিপ্রণযিনি
প্রণামস্ত্বৎপাদে শমিতদুরিতে কিং ন কুরুতে ॥ ৫২॥

মনঃস্তম্ভং স্তম্ভং গময়দুপকম্পং প্রণমতাং

সদা লোলং নীলং চিকুরজিতলোলম্বনিকরম্ ।

গিরাং দূরং স্মেরং ধৃতশশিকিশোরং পশুপতেঃ

দৃশাং যোগ্যং ভোগ্যং তুহিনগিরিভাগ্যং বিজয়তে ॥ ৫৩॥

ঘনশ্যামান্কামান্তকমহিষি কামাক্ষি মধুরান্

দৃশাং পাতানেতানমৃতজলশীতাননুপমান্ ।

ভবোৎপাতে ভীতে ময়ি বিতর নাথে দৃঢভব-

ন্মনশ্শোকে মূকে হিমগিরিপতাকে করুণয়া ॥ ৫৪॥

নতানাং মন্দানাং ভবনিগলবন্ধাকুলধিয়াং

মহান্ধ্যাং রুন্ধানামভিলষিতসন্তানলতিকাম্ ।

চরন্তীং কম্পায়াস্তটভুবি সবিত্রীং ত্রিজগতাং

স্মরামস্তাং নিত্যং স্মরমথনজীবাতুকলিকাম্ ॥ ৫৫॥

পরা বিদ্যা হৃদ্যাশ্রিতমদনবিদ্যা মরকত-

প্রভানীলা লীলাপরবশিতশূলায়ুধমনাঃ ।

তমঃপূরং দূরং চরণনতপৌরন্দরপুরী-

মৃগাক্ষী কামাক্ষী কমলতরলাক্ষী নয়তু মে ॥ ৫৬॥

অহন্তাখ্যা মৎকং কবলয়তি হা হন্ত হরিণী

হঠাৎসংবিদ্রূপং হরমহিষি সস্যাঙ্কুরমসৌ ।

কটাক্ষব্যাক্ষেপপ্রকটহরিপাষাণপটলৈঃ

ইমামুচ্চৈরুচ্চাটয ঝটিতি কামাক্ষি কৃপযা ॥ ৫৭॥

বুধে বা মূকে বা তব পততি যস্মিন্ক্ষণমসৌ

কটাক্ষঃ কামাক্ষি প্রকটজডিমক্ষোদপটিমা ।

কথংকারং নাস্মৈ করমুকুলচূডালমুকুটা

নমোবাকং ব্রূযুর্নমুচিপরিপন্থিপ্রভৃতযঃ ॥ ৫৮॥

প্রতীচীং পশ্যামঃ প্রকটরুচিনীবারকমণি-

প্রভাসধ্রীচীনাং প্রদলিতষডাধারকমলাম্ ।

চরন্তীং সৌষুম্নে পথি পরপদেন্দুপ্রবিগল-

ৎসুধার্দ্রাং কামাক্ষীং পরিণতপরংজ্যোতিরুদযাম্ ॥ ৫৯॥

জম্ভারাতিপ্রভৃতিমুকুটীঃ পাদযোঃ পীঠযন্তী

গুম্ফান্বাচাং কবিজনকৃতাস্স্বৈরমারামযন্তী ।

শম্পালক্ষ্মীং মণিগণরুচাপাটলৈঃ প্রাপযন্তী

কম্পাতীরে কবিপরিষদাং জৃম্ভতে ভাগ্যসীমা ॥ ৬০॥

চন্দ্রাপীডাং চতুরবদনাং চঞ্চলাপাঙ্গলীলাং

কুন্দস্মেরাং কুচভরনতাং কুন্তলোদ্ধূতভৃঙ্গাম্ ।

মারারাতের্মদনশিখিনং মাংসলং দীপযন্তীং

কামাক্ষীং তাং কবিকুলগিরাং কল্পবল্লীমুপাসে ॥ ৬১॥

কালাম্ভোদপ্রকরসুষমাং কান্তিভিস্তির্জযন্তী

কল্যাণানামুদযসরণিঃ কল্পবল্লী কবীনাম্ ।

কন্দর্পারেঃ প্রিযসহচরী কল্মষাণাং নিহন্ত্রী

কাঞ্চীদেশং তিলকযতি সা কাপি কারুণ্যসীমা ॥ ৬২॥

ঊরীকুর্বন্নুরসিজতটে চাতুরীং ভূধরাণাং

পাথোজানাং নযনযুগলে পরিপন্থ্যং বিতন্বন্ ।

কম্পাতীরে বিহরতি রুচা মোঘযন্মেঘশৈলীং

কোকদ্বেষং শিরসি কলযন্কোঽপি বিদ্যাবিশেষঃ ॥ ৬৩॥

কাঞ্চীলীলাপরিচযবতী কাপি তাপিচ্ছলক্ষ্মীঃ

জাড্যারণ্যে হুতবহশিখা জন্মভূমিঃ কৃপাযাঃ ।

মাকন্দশ্রীর্মধুরকবিতাচাতুরী কোকিলানাং

মার্গে ভূযান্মম নযনযোর্মান্মথী কাপি বিদ্যা ॥ ৬৪॥

সেতুর্মাতর্মরতকমযো ভক্তিভাজাং ভবাব্ধৌ

লীলালোলা কুবলযমযী মান্মথী বৈজযন্তী ।

কাঞ্চীভূষা পশুপতিদৃশাং কাপি কালাঞ্জনালী

মৎকং দুঃখং শিথিলযতু তে মঞ্জুলাপাঙ্গমালা ॥ ৬৫॥

ব্যাবৃণ্বানাঃ কুবলযদলপ্রক্রিযাবৈরমুদ্রাং

ব্যাকুর্বাণা মনসিজমহারাজসাম্রাজ্যলক্ষ্মীম্ ।

কাঞ্চীলীলাবিহৃতিরসিকে কাঙ্ক্ষিতং নঃ ক্রিয়াসুঃ

বন্ধচ্ছেদে তব নিযমিনাং বদ্ধদীক্ষাঃ কটাক্ষাঃ ॥ ৬৬॥

কালাম্ভোদে শশিরুচি দলং কৈতকং দর্শযন্তী

মধ্যেসৌদামিনি মধুলিহাং মালিকাং রাজযন্তী ।

হংসারাবং বিকচকমলে মঞ্জুমুল্লাসযন্তী

কম্পাতীরে বিলসতি নবা কাপি কারুণ্যলক্ষ্মীঃ ॥ ৬৭॥

চিত্রং চিত্রং নিজমৃদুতযা ভৎর্সযন্পল্লবালীং

পুংসাং কামান্ভুবি চ নিযতং পূরযন্পুণ্যভাজাম্ ।

জাতঃ শৈলান্ন তু জলনিধেঃ স্বৈরসংচারশীলঃ

কাঞ্চীভূষা কলযতু শিবং কোঽপি চিন্তামণির্মে ॥ ৬৮॥

তাম্রাম্ভোজং জলদনিকটে তত্র বন্ধূকপুষ্পং

তস্মিন্মল্লীকুসুমসুষমাং তত্র বীণানিনাদম্ ।

ব্যাবৃণ্বানা সুকৃতলহরী কাপি কাঞ্চিনগর্যাম্

ঐশানী সা কলযতিতরামৈন্দ্রজালং বিলাসম্ ॥ ৬৯॥

আহারাংশং ত্রিদশসদসামাশ্রযে চাতকানাম্

আকাশোপর্যপি চ কলযন্নালযং তুঙ্গমেষাম্ ।

কম্পাতীরে বিহরতিতরাং কামধেনুঃ কবীনাং

মন্দস্মেরো মদননিগমপ্রক্রিযাসম্প্রদাযঃ ॥ ৭০॥

আর্দ্রীভূতৈরবিরলকৃপৈরাত্তলীলাবিলাসৈঃ

আস্থাপূর্ণৈরধিকচপলৈরঞ্চিতাম্ভোজশিল্পৈঃ ।

কান্তৈর্লক্ষ্মীললিতভবনৈঃ কান্তিকৈবল্যসারৈঃ

কাশ্মল্যং নঃ কবলযতু সা কামকোটী কটাক্ষৈঃ ॥ ৭১ ॥

আধূন্বন্ত্যৈ তরলনযনৈরাঙ্গজীং বৈজযন্তীম্

আনন্দিন্যৈ নিজপদজুষামাত্তকাঞ্চীপুরাযৈ ।

আস্মাকীনং হৃদযমখিলৈরাগমানাং প্রপঞ্চৈঃ

আরাধ্যাযৈ স্পৃহযতিতরামদিমাযৈ জনন্যৈ ॥ ৭২ ॥

দূরং বাচাং ত্রিদশসদসাং দুঃখসিন্ধোস্তরিত্রং

মোহক্ষ্বেলক্ষিতিরুহবনে ক্রূরধারং কুঠারম্ ।

কম্পাতীরপ্রণযি কবিভির্বর্ণিতোদ্যচ্চরিত্রং

শান্ত্যৈ সেবে সকলবিপদাং শাংকরং তৎকলত্রম্ ॥ ৭৩॥

খণ্ডীকৃত্য প্রকৃতিকুটিলং কল্মষং প্রাতিভশ্রী-

শুণ্ডীরত্বং নিজপদজুষাং শূন্যতন্দ্রং দিশন্তী ।

তুণ্ডীরাখ্যে মহতি বিষযে স্বর্ণবৃষ্টিপ্রদাত্রী

চণ্ডী দেবী কলযতি রতিং চন্দ্রচূডালচূডে ॥ ৭৪ ॥

যেন খ্যাতো ভবতি স গৃহী পূরুষো মেরুধন্বা

যদ্দৃক্কোণে মদননিগমপ্রাভবং বোভবীতি ।

যৎপ্রীত্যৈব ত্রিজগদধিপো জৃম্ভতে কিম্পচানঃ

কম্পাতীরে স জযতি মহান্কশ্চিদোজোবিশেষঃ ॥ ৭৫॥

ধন্যা ধন্যা গতিরিহ গিরাং দেবি কামাক্ষি যন্মে

নিন্দ্যাং ভিন্দ্যাৎসপদি জডতাং কল্মষাদুন্মিষন্তীম্ ।

সাধ্বী মাধ্বীরসমধুরতাভঞ্জিনী মঞ্জুরীতিঃ

বাণীবেণী ঝটিতি বৃণুতাৎস্বর্ধুনীস্পর্ধিনী মাম্ ॥ ৭৬॥

যস্যা বাটী হৃদযকমলং কৌসুমী যোগভাজাং

যস্যাঃ পীঠী সততশিশিরা শীকরৈর্মাকরন্দৈঃ ।

যস্যাঃ পেটী শ্রুতিপরিচলন্মৌলিরত্নস্য কাঞ্চী

সা মে সোমাভরণমহিষী সাধযেৎকাঙ্ক্ষিতানি ॥ ৭৭॥

একা মাতা সকলজগতামীযুষী ধ্যানমুদ্রাম্

একাম্রাধীশ্বরচরণযোরেকতানাং সমিন্ধে ।

তাটঙ্কোদ্যন্মণিগণরুচা তাম্রকর্ণপ্রদেশা

তারুণ্যশ্রীস্তবকিততনুস্তাপসী কাপি বালা ॥ ৭৮॥

দন্তাদন্তিপ্রকটনকরী দন্তিভির্মন্দযানৈঃ

মন্দারাণাং মদপরিণতিং মথ্নতী মন্দহাসৈঃ ।

অঙ্কূরাভ্যাং মনসিজতরোরঙ্কিতোরাঃ কুচাভ্যা-

মন্তঃকাঞ্চি স্ফুরতি জগতামাদিমা কাপি মাতা ॥ ৭৯॥

ত্রিযম্বককুটুম্বিনীং ত্রিপুরসুন্দরীমিন্দিরাং

পুলিন্দপতিসুন্দরীং ত্রিপুরভৈরবীং ভারতীম্ ।

মতঙ্গকুলনাযিকাং মহিষমর্দনীং মাতৃকাং

ভণন্তি বিবুধোত্তমা বিহৃতিমেব কামাক্ষি তে ॥ ৮০॥

মহামুনিমনোনটী মহিতরম্যকম্পাতটী-

কুটীরকবিহারিণী কুটিলবোধসংহারিণী ।

সদা ভবতু কামিনী সকলদেহিনাং স্বামিনী

কৃপাতিশযকিংকরী মম বিভূতযে শাংকরী ॥ ৮১॥

জডাঃ প্রকৃতিনির্ধনা জনবিলোচনারুন্তুদা

নরা জননি বীক্ষণং ক্ষণমবাপ্য কামাক্ষি তে ।

বচস্সু মধুমাধুরীং প্রকটযন্তি পৌরন্দরী-

বিভূতিষু বিডম্বনাং বপুষি মান্মথীং প্রক্রিযাম্ ॥ ৮২॥

ঘনস্তনতটস্ফুটস্ফুরিতকঞ্চুলীচঞ্চলী-

কৃতত্রিপুরশাসনা সুজনশীলিতোপাসনা ।

দৃশোঃ সরণিমশ্নুতে মম কদা নু কাঞ্চীপুরে

পরা পরমযোগিনাং মনসি চিৎকুলা পুষ্কলা ॥ ৮৩॥

কবীন্দ্রহৃদযেচরী পরিগৃহীতকাঞ্চীপুরী

নিরূঢকরুণাঝরী নিখিললোকরক্ষাকরী ।

মনঃপথদবীযসী মদনশাসনপ্রেযসী

মহাগুণগরীযসী মম দৃশোঽস্তু নেদীযসী ॥ ৮৪॥

ধনেন ন রমামহে খলজনান্ন সেবামহে

ন চাপলমযামহে ভবভযান্ন দূযামহে ।

স্থিরাং তনুমহেতরাং মনসি কিং চ কাঞ্চীরত-

স্মরান্তককুটুম্বিনীচরণপল্লবোপাসনাম্ ॥ ৮৫॥

সুরাঃ পরিজনা বপুর্মনসিজায বৈরাযতে

ত্রিবিষ্টপনিতম্বিনীকুচতটী চ কেলীগিরিঃ ।

গিরঃ সুরভযো বযস্তরুণিমা দরিদ্রস্য বা

কটাক্ষসরণৌ ক্ষণং নিপতিতস্য কামাক্ষি তে ॥ ৮৬॥

পবিত্রয জগত্ত্রযীবিবুধবোধজীবাতুভিঃ

পুরত্রযবিমর্দিনঃ পুলককঞ্চুলীদাযিভিঃ ।

ভবক্ষযবিচক্ষণৈর্ব্যসনমোক্ষণৈর্বীক্ষণৈঃ

নিরক্ষরশিরোমণিং করুণযৈব কামাক্ষি মাম্ ॥ ৮৭॥

কদা কলিতখেলনাঃ করুণযৈব কাঞ্চীপুরে

কলাযমুকুলত্বিষঃ শুভকদম্বপূর্ণাঙ্কুরাঃ ।

পযোধরভরালসাঃ কবিজনেষু তে বন্ধুরাঃ

পচেলিমকৃপারসা পরিপতন্তি মার্গে দৃশোঃ ॥ ৮৮॥

অশোধ্যমচলোদ্ভবং হৃদয়নন্দনং দেহিনাম্

অনর্ঘমধিকাঞ্চি তৎকমপি রত্নমুদ্যোততে ।

অনেন সমলংকৃতা জয়তি শঙ্করাঙ্কস্থলী

কদাস্য মম মানসং ব্রজতি পেটিকাবিভ্রমম্ ॥ ৮৯॥

পরামৃতঝরীপ্লুতা জয়তি নিত্যমন্তশ্চরী

ভুবামপি বহিশ্চরী পরমসংবিদেকাত্মিকা ।

মহদ্ভিরপরোক্ষিতা সততমেব কাঞ্চীপুরে

মমান্বহমহংমতির্মনসি ভাতু মাহেশ্বরী ॥ ৯০॥

তমোবিপিনধাবিনং সততমেব কাঞ্চীপুরে

বিহাররসিকা পরা পরমসংবিদুর্বীরুহে ।

কটাক্ষনিগলৈর্দৃঢং হৃদয়দুষ্টদন্তাবলং

চিরং নয়তু মামকং ত্রিপুরবৈরিসীমন্তিনী ॥ ৯১॥

ত্বমেব সতি চণ্ডিকা ত্বমসি দেবি চামুণ্ডিকা

ত্বমেব পরমাতৃকা ত্বমপি যোগিনীরূপিণী ।

ত্বমেব কিল শাম্ভবী ত্বমসি কামকোটী জয়া

ত্বমেব বিজয়া ত্বয়ি ত্রিজগদম্ব কিং ব্রূমহে ॥ ৯২॥

পরে জননি পার্বতি প্রণতপালিনি প্রাতিভ-

প্রদাত্রি পরমেশ্বরি ত্রিজগদাশ্রিতে শাশ্বতে ।

ত্রিযম্বককুটুম্বিনি ত্রিপদসঙ্গিনি ত্রীক্ষণে

ত্রিশক্তিময়ি বীক্ষণং ময়ি নিধেহি কামাক্ষি তে ॥ ৯৩॥

মনোমধুকরোৎসবং বিদধতী মনীষাজুষাং

স্বয়ম্প্রভববৈখরীবিপিনবীথিকালম্বিনী ।

অহো শিশিরিতা কৃপামধুরসেন কম্পাতটে

চরাচরবিধায়িনী চলতি কাপি চিন্মঞ্জরী ॥ ৯৪ ॥

কলাবতি কলাভৃতো মুকুটসীম্নি লীলাবতি

স্পৃহাবতি মহেশ্বরে ভুবনমোহনে ভাস্বতি ।

প্রভাবতি রমে সদা মহিতরূপশোভাবতি

ত্বরাবতি পরে সতাং গুরুকৃপাম্বুধারাবতি ॥ ৯৫॥

ত্বয়ৈব জগদম্বয়া ভুবনমণ্ডলং সূয়তে

ত্বয়ৈব করুণার্দ্রয়া তদপি রক্ষণং নীয়তে ।

ত্বয়ৈব খরকোপয়া নয়নপাবকে হূয়তে

ত্বয়ৈব কিল নিত্যয়া জগতি সন্ততং স্থীয়তে ॥ ৯৬॥

চরাচরজগন্ময়ীং সকলহৃন্ময়ীং চিন্ময়ীং

গুণত্রয়ময়ীং জগত্ত্রয়ময়ীং ত্রিধামাময়ীম্ ।

পরাপরময়ীং সদা দশদিশাং নিশাহর্ময়ীং

পরাং সততসন্ময়ীং মনসি চিন্ময়ীং শীলয়ে ॥ ৯৭॥

জয জগদম্বিকে হরকুটুম্বিনি বক্ত্ররুচা
জিতশরদম্বুজে ঘনবিডম্বিনি কেশরুচা ।
পরমবলম্বনং কুরু সদা পররূপধরে
মম গতসংবিদো জডিমডম্বরতাণ্ডবিনঃ ॥ ৯৮॥

ভুবনজননি ভূষাভূতচন্দ্রে নমস্তে
কলুষশমনি কম্পাতীরগেহে নমস্তে ।
নিখিলনিগমবেদ্যে নিত্যরূপে নমস্তে
পরশিবময়ি পাশচ্ছেদহস্তে নমস্তে ॥ ৯৯॥

ক্বণৎকাঞ্চী কাঞ্চীপুরমণিবিপঞ্চীলযঝরী-
শিরঃকম্পা কম্পাবসতিরনুকম্পাজলনিধিঃ ।
ঘনশ্যামা শ্যামা কঠিনকুচসীমা মনসি মে
মৃগাক্ষী কামাক্ষী হরনটনসাক্ষী বিহরতাত্ ॥ ১০০॥

সমরবিজযকোটী সাধকানন্দধাটী
মৃদুগুণপরিপেটী মুখ্যকাদম্ববাটী ।
মুনিনুতপরিপাটী মোহিতাজাণ্ডকোটী
পরমশিববধূটী পাতু মাং কামকোটী ॥ ১০১॥

ইমং পরবরপ্রদং প্রকৃতিপেশলং পাবনং
পরাপরচিদাকৃতিপ্রকটনপ্রদীপাযিতম্ ।

স্তবং পঠতি নিত্যদা মনসি ভাবযন্নম্বিকাং

জপৈরলমলং মখৈরধিকদেহসংশোষণৈঃ ॥ ১০২॥

{স্তুতিশতকং সম্পূর্ণম্ ॥}

{॥ কটাক্ষশতকম্ ॥}

মোহান্ধকারনিবহং বিনিহন্তুমীডে

মূকাত্মনামপি মহাকবিতাবদান্যান্ ।

শ্রীকাঞ্চিদেশশিশিরীকৃতিজাগরূকান্

একাম্রনাথতরুণীকরুণাবলোকান্ ॥ ১॥

মাতর্জযন্তি মমতাগ্রহমোক্ষণানি

মাহেন্দ্রনীলরুচিশিক্ষণদক্ষিণানি ।

কামাক্ষি কল্পিতজগত্ত্রযরক্ষণানি

ত্বদ্বীক্ষণানি বরদানবিচক্ষণানি ॥ ২॥

আনঙ্গতন্ত্রবিধিদর্শিতকৌশলানাম্

আনন্দমন্দপরিঘূর্ণিতমন্থরাণাম্ ।

তারল্যমম্ব তব তাডিতকর্ণসীম্নাং

কামাক্ষি খেলতি কটাক্ষনিরীক্ষণানাম্ ॥ ৩॥

কল্লোলিতেন করুণারসবেল্লিতেন

কল্মাষিতেন কমনীযমৃদুস্মিতেন ।

মামঞ্চিতেন তব কিংচন কুঞ্চিতেন

কামাক্ষি তেন শিশিরীকুরু বীক্ষিতেন ॥ ৪॥

সাহায্যকং গতবতী মুহুরর্জনস্য

মন্দস্মিতস্য পরিতোষিতভীমচেতাঃ ।

কামাক্ষি পাণ্ডবচমূরিব তাবকীনা

কর্ণান্তিকং চলতি হন্ত কটাক্ষলক্ষ্মীঃ ॥ ৫॥

অস্তং ক্ষণান্নযতু মে পরিতাপসূর্যম্

আনন্দচন্দ্রমসমানযতাং প্রকাশম্ ।

কালান্ধকারসুষুমাং কলযন্দিগন্তে

কামাক্ষি কোমলকটাক্ষনিশাগমস্তে ॥ ৬॥

তাটাঙ্কমৌক্তিকরুচাঙ্কুরদন্তকান্তিঃ

কারুণ্যহস্তিপশিখামণিনাধিরূঢঃ ।

উন্মূলযত্বশুভপাদপমস্মদীযং

কামাক্ষি তাবককটাক্ষমতঙ্গজেতন্দ্রঃ ॥ ৭॥

ছাযাভরণে জগতাং পরিতাপহারী

তাটঙ্করত্নমণিতল্লজপল্লবশ্রীঃ ।

কারুণ্যনাম বিকিরন্মকরন্দজালং
কামাক্ষি রাজতি কটাক্ষসুরদ্রুমস্তে ॥ ৮॥

সূর্যাশ্রয়প্রণয়িনী মণিকুণ্ডলাংশু-
লৌহিত্যকোকনদকাননমাননীয়া ।
যান্তী তব স্মরহরাননকান্তিসিন্ধুং
কামাক্ষি রাজতি কটাক্ষকলিন্দকন্যা ॥ ৯॥

প্রাপ্নোতি যং সুকৃতিনং তব পক্ষপাতাত্
কামাক্ষি বীক্ষণবিলাসকলাপুরন্ধ্রী ।
সদ্যস্তমেব কিল মুক্তিবধূর্বৃণীতে
তস্মান্নিতান্তমনয়োরিদমৈকমত্যম্ ॥ ১০॥

যান্তী সদৈব মরুতামনুকূলভাবং
ভ্রূবল্লিশক্রধনুরুল্লসিতা রসার্দ্রা ।
কামাক্ষি কৌতুকতরঙ্গিতনীলকণ্ঠা
কাদম্বিনীব তব ভাতি কটাক্ষমালা ॥ ১১॥

গঙ্গাম্ভসি স্মিতময়ে তপনাত্মজেব
গঙ্গাধরোরসি নবোৎপলমালিকেব ।
বক্ত্রপ্রভাসরসি শৈবলমণ্ডলীব
কামাক্ষি রাজতি কটাক্ষরুচিচ্ছটা তে ॥ ১২॥

সংস্কারতঃ কিমপি কন্দলিতান্ রসজ্ঞ-

কেদারসীম্নি সুধিযামুপভোগযোগ্যান্ ।

কল্যাণসূক্তিলহরীকলমাংকুরান্নঃ

কামাক্ষি পক্ষ্মলযতু ত্বদপাঙ্গমেঘঃ ॥ ১৩॥

চাঞ্চল্যমেব নিযতং কলযন্প্রকৃত্যা

মালিন্যভূঃ শ্রুতিপথাক্রমজাগরূকঃ ।

কৈবল্যমেব কিমু কল্পযতে নতানাং

কামাক্ষি চিত্রমপি তে করুণাকটাক্ষঃ ॥ ১৪॥

সংজীবনে জননি চূতশিলীমুখস্য

সংমোহনে শশিকিশোরকশেখরস্য ।

সংস্তম্ভনে চ মমতাগ্রহচেষ্টিতস্য

কামাক্ষি বীক্ষণকলা পরমৌষধং তে ॥ ১৫॥

নীলোঽপি রাগমধিকং জনযন্পুরারেঃ

লোলোঽপি ভক্তিমধিকাং দৃঢযন্নরাণাম্ ।

বক্রোঽপি দেবি নমতাং সমতাং বিতন্বন্

কামাক্ষি নৃত্যতু মযি ত্বদপাঙ্গপাতঃ ॥ ১৬॥

কামদ্রুহো হৃদযযন্ত্রণজাগরূকা

কামাক্ষি চঞ্চলদৃগঞ্চলমেখলা তে ।

আশ্চর্যমম্ব ভজতাং ঝটিতি স্বকীয-

সম্পর্ক এব বিধুনোতি সমস্তবন্ধান্ ॥ ১৭॥

কুণ্ঠীকরোতু বিপদং মম কুঞ্চিতভ্রূ-

চাপাঞ্চিতঃ শ্রিতবিদেহভবানুরাগঃ ।

রক্ষোপকারমনিশং জনযঞ্জগত্যাং

কামাক্ষি রাম ইব তে করুণাকটাক্ষঃ ॥ ১৮॥

শ্রীকামকোটি শিবলোচনশোষিতস্য

শৃঙ্গারবীজবিভবস্য পুনঃপ্ররোহে ।

প্রেমাম্ভসার্দ্রমচিরাৎপ্রচুরেণ শঙ্কে

কেদারমম্ব তব কেবলদৃষ্টিপাতম্ ॥ ১৯॥

মাহাত্ম্যশেবধিরসৌ তব দুর্বিলঙ্ঘ্য-

সংসারবিন্ধ্যগিরিকুণ্ঠনকেলিচুঞ্চুঃ ।

ধৈর্যাম্বুধিং পশুপতেশ্চুলকীকরোতি

কামাক্ষি বীক্ষণবিজৃম্ভণকুম্ভজন্মা ॥ ২০॥

পীযূষবর্ষবশিশিরা স্ফুটদুৎপলশ্রী-

মৈত্রী নিসর্গমধুরা কৃততারকাপ্তিঃ ।

কামাক্ষি সংশ্রিতবতী বপুরষ্টমূর্তেঃ

জ্যোৎস্নাযতে ভগবতি ত্বদপাঙ্গমালা ॥ ২১॥

অম্ব স্মরপ্রতিভটস্য বপুর্মনোজ্ঞম্
অম্ভোজকাননমিবাঞ্চিতকণ্টকাভম্ ।
ভৃঙ্গীব চুম্বতি সদৈব সপক্ষপাতা
কামাক্ষি কোমলরুচিস্ত্বদপাঙ্গমালা ॥ ২২॥

কেশপ্রভাপটলনীলবিতানজালে
কামাক্ষি কুণ্ডলমণিচ্ছবিদীপশোভে ।
শঙ্কে কটাক্ষরুচিরঙ্গতলে কৃপাখ্যা
শৈলূষিকা নটতি শংকরবল্লভে তে ॥ ২৩॥

অত্যন্তশীতলমতন্দ্রযতু ক্ষণার্ধম্
অস্তোকবিভ্রমমনঙ্গবিলাসকন্দম্ ।
অল্পস্মিতাদৃতমপারকৃপাপ্রবাহম্
অক্ষিপ্ররোহমচিরান্ময়ি কামকোটি ॥ ২৪॥

মন্দাক্ষরাগতরলীকৃতিপারতন্ত্র্যাত্
কামাক্ষি মন্থরতরাং ত্বদপাঙ্গডোলাম্ ।
আরুহ্য মন্দমতিকৌতুকশালি চক্ষুঃ
আনন্দমেতি মুহুরর্ধশশাঙ্কমৌলেঃ ॥ ২৫॥

ত্রৈযম্বকং ত্রিপুরসুন্দরি হর্ম্যভূমি-
রঙ্গং বিহারসরসী করুণাপ্রবাহঃ ।

দাসাশ্চ বাসবমুখাঃ পরিপালনীযং
কামাক্ষি বিশ্বমপি বীক্ষণভূভৃতস্তে ॥ ২৬॥

বাগীশ্বরী সহচরী নিযমেন লক্ষ্মীঃ
ভূবল্লরীবশকরী ভুবনানি গেহম্ ।
রূপং ত্রিলোকনযনামৃতমম্ব তেষাং
কামাক্ষি যেষু তব বীক্ষণপারতন্ত্রী ॥ ২৭॥

মাহেশ্বরং ঝটিতি মানসমীনমম্ব
কামাক্ষি ধৈর্যজলধৌ নিতরাং নিমগ্নম্ ।
জালেন শৃঙ্খলযতি ত্বদপাঙ্গনাম্না
বিস্তারিতেন বিষমাযুধদাশকোঽসৌ ॥ ২৮॥

উন্মথ্য বোধকমলাকারমম্ব জাড্য-
স্তম্বেরমং মম মনোবিপিনে ভ্রমন্তম্ ।
কুণ্ঠীকুরুষ্ব তরসা কুটিলাগ্রসীম্না
কামাক্ষি তাবককটাক্ষমহাঙ্কুশেন ॥ ২৯॥

উদ্বেল্লিতস্তবকিতৈর্ললিতৈর্বিলাসৈঃ
উত্থায দেবি তব গাঢকটাক্ষকুঞ্জাত্ ।
দূরং পলাযযতু মোহমৃগীকুলং মে
কামাক্ষি স্তবরমনুগ্রহকেসরীন্দ্রঃ ॥ ৩০॥

স্নেহাদৃতাং বিদলিতোৎপলকন্তিচোরাং
জেতারমেব জগদীশ্বরি জেতুকামঃ ।
মানোদ্ধতো মকরকেতুরসৌ ধুনীতে
কামাক্ষি তাবককটাক্ষকৃপাণবল্লীম্ ॥ ৩১ ॥

শ্রৌতীং ব্রজন্নপি সদা সরণিং মুনীনাং
কামাক্ষি সন্ততমপি স্মৃতিমার্গগামী ।
কৌটিল্যমম্ব কথমস্থিরতাং চ ধত্তে
চৌর্যং চ পঙ্কজরুচাং ত্বদপাঙ্গপাতঃ ॥ ৩২ ॥

নিত্যং শ্রুতেঃ পরিচিতৌ যতমানমেব
নীলোৎপলং নিজসমীপনিবাসলোলম্ ।
প্রীত্যৈব পাঠযতি বীক্ষণদেশিকেন্দ্রঃ
কামাক্ষী কিন্তু তব কালিমসম্প্রদাযম্ ॥ ৩৩॥

ভ্রান্ত্বা মুহুঃ স্তবকিতস্মিতফেনরাশৌ
কামাক্ষি বক্ত্ররুচিসংচযবারিরাশৌ ।
আনন্দতি ত্রিপুরমর্দননেত্রলক্ষ্মীঃ
আলম্ব্য দেবি তব মন্দমপাঙ্গসেতুম্ ॥ ৩৪ ॥

শ্যামা তব ত্রিপুরসুন্দরি লোচনশ্রীঃ
কামাক্ষি কন্দলিতমেদুরতারকান্তিঃ ।

জ্যোৎস্নাবতী স্মিতরুচাপি কথং তনোতি
স্পর্ধামহো কুবলয়ৈশ্চ তথা চকোরৈঃ ॥ ৩৫॥

কালাঞ্জনং চ তব দেবি নিরীক্ষণং চ
কামাক্ষি সাম্যসরণিং সমুপৈতি কান্ত্যা ।
নিশ্শেষনেত্রসুলভং জগতীষু পূর্ব-
মন্যত্ত্রিনেত্রসুলভং তুহিনাদ্রিকন্যে ॥ ৩৬॥

ধূমাঙ্কুরো মকরকেতনপাবকস্য
কামাক্ষি নেত্ররুচিনীলিমচাতুরী তে ।
অত্যন্তমদ্ভুতমিদং নয়নত্রয়স্য
হর্ষোদযং জনয়তে হরুণাঙ্কমৌলেঃ ॥৩৭॥

আরভ্ভলেশসময়ে তব বীক্ষণস্স
কামাক্ষি মূকমপি বীক্ষণমাত্রনম্রম্ ।
সর্বজ্ঞতা সকললোকসমক্ষমেব
কীর্তিস্বযংবরণমাল্যবতী বৃণীতে ॥ ৩৮॥

কালাম্বুবাহ উব তে পরিতাপহারী
কামাক্ষি পুষ্করমধঃকুরুতে কট্াষঃ ।
পূর্বঃ পরং ক্ষণরুচা সমুপৈতি মৈত্রী-
মন্যস্তু স৷ততরুচিং প্রকটীকরোতি ॥ ৩৯॥

সূক্ষ্মেঽপি দুর্গমতরেঽপি গুরুপ্রসাদ-

সাহায্যকেন বিচরন্নপবর্গমার্গে ।

সংসারপঙ্কনিচয়ে ন পতত্যমূং তে

কামাক্ষি গাঢমবলম্ব্য কটাক্ষযষ্টিম্ ॥ ৪০॥

কামাক্ষি সন্ততমসৌ হরিনীলরত্ন-

স্তম্ভে কটাক্ষরুচিপুঞ্জময়ে ভবত্যাঃ ।

বদ্ধোঽপি ভক্তিনিগলৈর্মম চিত্তহস্তী

স্তম্ভং চ বন্ধমপি মুঞ্চতি হন্ত চিত্রম্ ॥ ৪১॥

কামাক্ষি কার্ষ্ণ্যমপি সন্ততমঞ্জনং চ

বিভ্রন্নিসর্গতরলোঽপি ভবৎকটাক্ষঃ ।

বৈমল্যমন্বহমনঞ্জনতা চ ভূয়ঃ

স্থৈর্যং চ ভক্তহৃদয়ায় কথং দদাতি ॥ ৪২॥

মন্দস্মিতস্তবকিতং মণিকুণ্ডলাংশু-

স্তোমপ্রবালরুচিরং শিশিরীকৃতাশম্ ।

কামাক্ষি রাজতি কটাক্ষরুচেঃ কদম্বম্

উদ্যানমম্ব করুণাহরিণেক্ষণায়াঃ ॥ ৪৩॥

কামাক্ষি তাবককটাক্ষমহেন্দ্রনীল-

সিংহাসনং শ্রিতবতো মকরধ্বজস্য ।

সাম্রাজ্যমঙ্গলবিধৌ মুণিকুণ্ডলশ্রীঃ

নীরাজনোৎসবতরঙ্গিতদীপমালা ॥ ৪৪॥

মাতঃ ক্ষণং স্নপয মাং তব বীক্ষিতেন

মন্দাক্ষিতেন সুজনৈরপরোক্ষিতেন ।

কামাক্ষি কর্মতিমিরোৎকরভাস্করেণ

শ্রেযস্করেণ মধুপদ্যুতিতস্করেণ ॥ ৪৫॥

প্রেমাপগাপযসি মজ্জনমারচয্য

যুক্তঃ স্মিতাংশুকৃতভস্মবিলেপনেন ।

কামাক্ষি কুণ্ডলমণিদ্যুতিভির্জটালঃ

শ্রীকণ্ঠমেব ভজতে তব দৃষ্টিপাতঃ ॥ ৪৬॥

কৈবল্যদায করুণারসকিংকরায

কামাক্ষি কন্দলিতবিভ্রমশংকরায ।

আলোকনায তব ভক্তশিবংকরায

মাতর্নমোঽস্তু পরতন্ত্রিতশংকরায ॥ ৪৭॥

সাম্রাজ্যমঙ্গলবিধৌ মকরধ্বজস্য

লোলালকালিকৃততোরণমাল্যশোভে ।

কামেশ্বরি প্রচলদুৎপলবৈজযন্তী-

চাতুর্যমেতি তব চঞ্চলদৃষ্টিপাতঃ ॥ ৪৮॥

মার্গেণ মঞ্জুকচকান্তিতমোবৃতেন

মন্দায়মানগমনা মদনাতুরাসৌ ।

কামাক্ষি দৃষ্টিরযতে তব শংকরায

সংকেতভূমিমচিরাদভিসারিকেব ॥ ৪৯॥

ব্রীডনুবৃত্তিরমণীকৃতসাহচর্যা

শৈবালিতাং গলরুচা শশিশেখরস্য ।

কামাক্ষি কান্তিসরসীং ত্বদপাঙ্গলক্ষ্মীঃ

মন্দং সমাশ্রযতি মজ্জনখেলনায ॥ ৫০॥

কাষাযমংশুকমিব প্রকটং দধানো

মাণিক্যকুণ্ডলরুচিং মমতাবিরোধী ।

শ্রুত্যন্তসীমনি রতঃ সুতরাং চকাস্তি

কামাক্ষি তাবককটাক্ষযতীশ্বরোঽসৌ ॥ ৫১॥

পাষাণ এব হরিনীলমণির্দিনেষু

প্রম্লনতাং কুবলযং প্রকটীকরোতি ।

নৌমিত্তিকো জলদমেচকিমা ততস্তে

কামাক্ষি শূন্যমুপমনমপাঙ্গলক্ষ্ম্যাঃ ॥ ৫২॥

শৃঙ্গারবিভ্রমবতী সুতরাং সলজ্জা

নাসাগ্রমৌক্তিকরুচা কৃতমন্দহাসা ।

শ্যামা কটাক্ষসুষমা তব যুক্তমেতত্

কামাক্ষি চুম্বতি দিগম্বরবক্ত্রবিম্বম্ ॥ ৫৩॥

নীলোৎপলেন মধুপেন চ দৃষ্টিপাতঃ

কামাক্ষি তুল্য ইতি তে কথমামনন্তি ।

শৈত্যেন নিন্দযতি যদন্বহমিন্দুপাদান্

পাথোরুহেণ যদসৌ কলহাযতে চ ॥ ৫৪॥

ওষ্ঠপ্রভাপটলবিদ্রুমমুদ্রিতে তে

ভ্রূবল্লিবীচিসুভগে মুখকান্তিসিন্ধৌ ।

কামাক্ষি বারিভরপূরণলম্বমান-

কালাম্বুবাহসরণিং লভতে কটাক্ষঃ ॥ ৫৫॥

মন্দস্মিতৈর্ধবলিতা মণিকুণ্ডলাংশু-

সম্পর্কলোহিতরুচিস্ত্বদপাঙ্গধারা ।

কামাক্ষি মল্লিকুসুমৈর্নবপল্লবৈশ্চ

নীলোৎপলৈশ্চ রচিতেব বিভাতি মালা ॥ ৫৬॥

কামাক্ষি শীতলকৃপারসনির্ঝরাম্ভঃ-

সম্পর্কপক্ষ্মলরুচিস্ত্বদপাঙ্গমালা ।

গোভিঃ সদা পুররিপোরভিলষ্যমাণা

দূর্বাকদম্বকবিডম্বনমাতনোতি ॥ ৫৭॥

হৃৎপঙ্কজং মম বিকাসযতু প্রমুষ্ণ-

ন্নুল্লাসমুৎপলরুচেস্তমসাং নিরোদ্ধা ।

দোষানুষঙ্গজডতাং জগতাং ধুনানঃ

কামাক্ষি বীক্ষণবিলাসদিনোদযস্তে ॥ ৫৮॥

চক্ষুর্বিমোহযতি চন্দ্রবিভূষণস্য

কামাক্ষি তাবককটাক্ষতমঃপ্ররোহঃ ।

প্রত্যঙ্মুখং তু নযনং স্তিমিতং মুনীনাং

প্রাকাশ্যমেব নযতীতি পরং বিচিত্রম্ ॥ ৫৯॥

কামাক্ষি বীক্ষণরুচা যুধি নির্জিতং তে

নীলোৎপলং নিরবশেষগতাভিমানম্ ।

আগত্য তৎপরিসরং শ্রবণবতংস-

ব্যোজেন নূনমভযার্থনমাতনোতি ॥ ৬০॥

আশ্চর্যমম্ব মদানাভ্যুদযাবলম্বঃ

কামাক্ষি চঞ্চলনিরীক্ষণবিভ্রমস্তে ।

ধৈর্যং বিধূয তনুতে হৃদি রাগবন্ধং

শম্ভোস্তদেব বিপরীততযা মুনীনাম্ ॥ ৬১॥

জন্তোঃ সকৃৎপ্রণমতো জগদীড্যতাং চ

তেজাস্বিতাং চ নিশিতাং চ মতিং সভাযাম্ ।

কামাক্ষি মাক্ষিকঝরীমিব বৈখরীং চ
লক্ষ্মীং চ পক্ষ্মলযতি ক্ষণবীক্ষণং তে ॥ ৬২॥

কাদম্বিনী কিমযতে ন জলানুষঙ্গং
ভৃঙ্গাবলী কিমুররীকুরুতে ন পদ্মম্ ।
কিং বা কলিন্দতনযা সহতে ন ভঙ্গং
কামাক্ষি নিশ্চযপদং ন তবাক্ষিলক্ষ্মীঃ ॥ ৬৩॥

কাকোলপাবকতৃণীকরণেঽপি দক্ষঃ
কামাক্ষি বালকসুধাকরশেখরস্য ।
অত্যন্তশীতলতমোঽপ্যনুপারতং তে
চিত্তং বিমোহযতি চিত্রমযং কটাক্ষঃ ॥ ৬৪॥

কার্পণ্যপূরপরিবর্ধিতমম্ব মোহ-
কন্দোদ্গতং ভবমযং বিষপাদপং মে ।
তুঙ্গং ছিনত্তু তুহিনাদ্রিসুতে ভবত্যাঃ
কাঞ্চীপুরেশ্বরি কটাক্ষকুঠারধারা ॥ ৬৫॥

কামাক্ষি ঘোরভবরোগচিকিৎসনার্থ-
মভ্যর্থ্য দেশিককটাক্ষভিষকপ্রসাদাত্ ।
তত্রাপি দেবি লভতে সুকৃতী কদাচি-
দন্যস্য দুর্লভমপাঙ্গমহৌষধং তে ॥ ৬৬॥

কামাক্ষি দেশিককৃপাংকুরমাশ্রয়ন্তো

নানাতপোনিযমনাশিতপাশবন্ধাঃ ।

বাসালযং তব কটাক্ষমমুং মহান্তো

লব্ধ্বা সুখং সমাধিযো বিচরন্তি লোকে ॥ ৬৭॥

সাকূতসংলপিতসম্ভৃতমুগ্ধহাসং

ব্রীডানুরাগসহচারি বিলোকনং তে ।

কামাক্ষি কামপরিপন্থিনি মারবীর-

সাম্রাজ্যবিভ্রমদশাং সফলীকরোতি ॥ ৬৮॥

কামাক্ষি বিভ্রমবলৈকনির্ধির্বিধায

ভ্রূবল্লিচাপকুটিলীকৃতিমেব চিত্রম্ ।

স্বাধীনতাং তব নিনায শশাঙ্কমৌলে-

রঙ্গার্ধরাজ্যসুখলাভমপাঙ্গবীরঃ ॥ ৬৯॥

কামাংকুরৈকনিলযস্তব দৃষ্টিপাতঃ

কামাক্ষি ভক্তমনসাং প্রদদাতু কামান্ ।

রাগান্বিতঃ স্বযমপি প্রকটীকরোতি

বৈরাগ্যমেব কথমেষ মহামুনীনাম্ ॥ ৭০॥

কালাম্বুবাহনিবহৈঃ কলহাযতে তে

কামাক্ষি কালিমমদেন সদা কটাক্ষঃ ।

চিত্রং তথাপি নিতরামমুমেব দৃষ্ট্বা

সোৎকণ্ঠ এব রমতে কিল নীলকণ্ঠঃ ॥ ৭১॥

কামাক্ষি মন্মথরিপুং প্রতি মারতাপ-

মোহান্ধকারজলদাগমনেন নৃত্যন্ ।

দুষ্কর্মকঞ্চুকিকুলং কবলীকরোতু

ব্যামিশ্রমেচকরুচিস্ত্বদপাঙ্গকেকী ॥ ৭২॥

কামাক্ষি মন্মথরিপোরবলোকনেষু

কান্তং পযোজমিব তাবকমক্ষিপাতম্ ।

প্রেমাগমো দিবসবদ্বিকচীকরোতি

লজ্জাভরো রজনিবন্মুকুলীকরোতি ॥ ৭৩॥

মূকো বিরিঞ্চতি পরং পুরুষঃ কুরূপঃ

কন্দর্পতি ত্রিদশরাজতি কিম্পচানঃ ।

কামাক্ষি কেবলমুপক্রমকাল এব

লীলাতরঙ্গিতকটাক্ষরুচঃ ক্ষণং তে ॥ ৭৪॥

নীলালকা মধুকরন্তি মনোজ্ঞনাসা-

মুক্তারুচঃ প্রকটকন্দবিসাঙ্কুরন্তি ।

কারুণ্যমম্ব মকরন্দতি কামকোটি

মন্যে ততঃ কমলমেব বিলোচনং তে ॥ ৭৫॥

আকাংক্ষ্যমাণফলদানবিচক্ষণায়াঃ ।

কামাক্ষি তাবককটাক্ষককামধেনোঃ ।

সম্পর্ক এব কথমম্ব বিমুক্তপাশ-

বন্ধাঃ স্ফুটং তনুভৃতঃ পশুতাং ত্যজন্তি ॥ ৭৬॥

সংসারঘর্মপরিতাপজুষাং নরাণাং

কামাক্ষি শীতলতরাণি তবেক্ষিতানি ।

চন্দ্রাতপন্তি ঘনচন্দনকর্দমন্তি

মুক্তাগুণন্তি হিমবারিনিষেচনন্তি ॥ ৭৭॥

প্রেমাম্বুরাশিসততস্নপিতানি চিত্রং

কামাক্ষি তাবককটাক্ষনিরীক্ষণানি ।

সন্ধুক্ষয়ন্তি মুহুরিন্ধনরাশিরীত্যা

মারদ্রুহো মনসি মন্মথচিত্রভানুম্ ॥ ৭৮॥

কালাঞ্জনপ্রতিভটং কমনীয়কান্ত্যা

কন্দর্পতন্ত্রকলয়া কলিতানুভাবম্ ।

কাঞ্চীবিহাররসিকে কলুষার্তিচোরং

কল্লোলয়স্ব ময়ি তে করুণাকটাক্ষম্ ॥ ৭৯॥

ক্রান্তেন মন্মথদেন বিমোহ্যমান-

স্বান্তেন চূততরুমূলগতস্য পুংসঃ ।

কান্তেন কিংচিদবলোকয লোচনস্য

প্রান্তেন মাং জননি কাঞ্চিপুরীবিভূষে ॥ ৮০॥

কামাক্ষি কোঽপি সুজনাস্ত্বদপাঙ্গসংগে

কণ্ঠেন কন্দলিতকালিমসম্প্রদাযাঃ ।

উত্তংসকল্পিতচকোরকুটুম্বপোষা

নক্তন্দিবসপ্রসবভূনযনা ভবন্তি ॥ ৮১॥

নীলোৎপলপ্রসবকান্তিনির্দশনেন

কারুণ্যবিভ্রমজুষা তব বীক্ষণেন ।

কামাক্ষি কর্মজলধেঃ কলশীসুতেন

পাশত্রযাদ্বযমমী পরিমোচনীযাঃ ॥ ৮২॥

অত্যন্তচঞ্চলমকৃত্রিমমঞ্জনং কিং

ঝংকারভঙ্গিরহিতা কিমু ভৃঙ্গমালা ।

ধূমাঙ্কুরঃ কিমু হুতাশনসংগহীনঃ

কামাক্ষি নেত্ররুচিনীলিমকন্দলী তে ॥ ৮৩॥

কামাক্ষি নিত্যমযমঞ্জলিরস্তু মুক্তি-

বীজায বিভ্রমমদোদযঘূর্ণিতায ।

কন্দর্পদর্পপুনরুদ্ভবসিদ্ধিদায

কল্যাণদায তব দেবি দৃগঞ্চলায ॥ ৮৪॥

দর্পাঙ্কুরো মকরকেতনবিভ্রমাণাং

নিন্দাঙ্কুরো বিদলিতোৎপলচাতুরীণাম্ ।

দীপাঙ্কুরো ভবতমিস্রকদম্বকানাং

কামাক্ষি পালযতু মাং ত্বদপাঙ্গপাতঃ ॥ ৮৫॥

কৈবল্যদিব্যমণিরোহণপর্বতেভ্যঃ

কারুণ্যনির্ঝরপযঃকৃতমজ্ঞনেভ্যঃ ।

কামাক্ষি কিংকরিতশঙ্করমানসেভ্য-

স্তেভ্যো নমোঽস্তু তব বীক্ষণবিভ্রমেভ্যঃ ॥ ৮৬॥

অল্লীয এব নবমুৎপলমম্ব হীনা

মীনস্য বা সরণিরম্বুরুহাং চ কিং বা ।

দূরে মৃগীদৃগসমঞ্জসমঞ্জনং চ

কামাক্ষি বীক্ষণরুচৌ তব তর্কযামঃ ॥ ৮৭॥

মিশ্রীভবদ্গরলপঙ্কিলশঙ্করোরস্-

সীমাঙ্গণে কিমপি রিঙ্খণমাদধানঃ ।

হেলাবধূতললিতশ্রবণোৎপলোঽসৌ

কামাক্ষি বাল ইব রাজতি তে কটাক্ষঃ ॥ ৮৮॥

প্রৌঢিকরোতি বিদুষাং নবসূক্তিধাটী-

চূতাটবীষু বুধকোকিললাল্যমানম্ ।

মাধ্বীরসং পরিমলং চ নিরর্গলং তে

কামাক্ষি বীক্ষণবিলাসবসন্তলক্ষ্মীঃ ॥ ৮৯॥

কূলংকষং বিতনুতে করুণাম্বুবর্ষী

সারস্বতং সুকৃতিনঃ সুলভং প্রবাহম্ ।

তুচ্ছীকরোতি যমুনাম্বুতরঙ্গভঙ্গীং

কামাক্ষি কিং তব কটাক্ষমহাম্বুবাহঃ ॥ ৯০॥

জগর্তি দেবি করুণাশুকসুন্দরী তে

তাটঙ্করত্নরুচিদাডিমখণ্ডশোণে ।

কামাক্ষি নির্ভরকটাক্ষমরীচিপুঞ্জ-

মাহেন্দ্রনীলমণিপঞ্জরমধ্যভাগে ॥ ৯১॥

কামাক্ষি সৎকুবলযস্য সগোত্রভাবা-

দাক্রামতি শ্রুতিমসৌ তব দৃষ্টিপাতঃ ।

কিংচ স্ফুটং কুটিলতাং প্রকটীকরোতি

ভ্রূবল্লরীপরিচিতস্য ফলং কিমেতত্ ॥ ৯২॥

এষা তবাক্ষিসুষমা বিষমাযুধস্য

নারাচবর্ষলহরী নগরাজকন্যে ।

শংকে করোতি শতধা হৃদি ধৈর্যমুদ্রাং

শ্রীকামকোটি যদসৌ শিশিরাংশুমৌলেঃ ॥ ৯৩॥

বাণেন পুষ্পধনুষঃ পরিকল্প্যমান-

ত্রাণেন ভক্তমনসাং করুণাকরেণ ।

কোণেন কোমলদৃশস্তব কামকোটি

শোণেন শোষয শিবে মম শোকসিন্ধুম্ ॥ ৯৪॥

মারদ্রুহা মুকুটসীমনি লাল্যমানে

মন্দাকিনীপযসি তে কুটিলং চরিষ্ণুঃ ।

কামাক্ষি কোপরভসাদ্বলমানমীন-

সন্দেহমঙ্কুরযতি ক্ষণমক্ষিপাতঃ ॥ ৯৫॥

কামাক্ষি সংবলিতমৌক্তিককুণ্ডলাংশু-

চঞ্চত্সিতশ্রবণচামরচাতুরীকঃ ।

স্তম্ভে নিরন্তরমপাঙ্গমযে ভবত্যা

বদ্ধশ্চকাস্তি মকরধ্বজমত্তহস্তী ॥ ৯৬॥

যাবৎকটাক্ষরজনীসমযাগমস্তে

কামাক্ষি তাবদচিরান্নমতাং নরাণাম্ ।

আবির্ভবত্যমৃতদীধিতিবিম্বমম্ব

সংবিন্ময়ং হৃদযপূর্বগিরীন্দ্রশৃঙ্গে ॥ ৯৭॥

কামাক্ষি কল্পবিটপীব ভবৎকটাক্ষো

দিৎসুঃ সমস্তবিভবং নমতাং নরাণাম্ ।

ভৃঙ্গস্য নীলনলিনস্য চ কান্তিসম্প-

ৎসর্বস্বমেব হরতীতি পরং বিচিত্রম্ ॥ ৯৮॥

অত্যন্তশীতলমনর্গলকর্মপাক-

কাকোলহারি সুলভং সুমনোভিরেতত্ ।

পীযূষমেব তব বীক্ষণমম্ব কিন্তু

কামাক্ষি নীলমিদমিত্যযমেব ভেদঃ ॥ ৯৯॥

অজ্ঞাতভক্তিরসমপ্রসরদ্বিবেক-

মত্যন্তগর্বমনধীতসমস্তশাস্ত্রম্ ।

অপ্রাপ্তসত্যমসমীপগতং চ মুক্তেঃ

কামাক্ষি নৈব তব স্পৃহযতি দৃষ্টিপাতঃ ॥ ১০০॥

(কামাক্ষি মামবতু তে করুণাকটাক্ষঃ)

পাতেন লোচনরুচেস্তব কামকোটি

পোতেন পতকপযোধিভযাতুরাণাম্ ।

পূতেন তেন নবকাঞ্চনকুণ্ডলাংশু-

বীতেন শীতলয ভূধরকন্যকে মাম্ ॥ ১০১॥

{কটাক্ষশতকং সম্পূর্ণম্ ॥}

{॥ মন্দস্মিতশতকম্ ॥}

বধ্নীমো বযমঞ্জলিং প্রতিদিনং বন্ধচ্ছিদে দেহিনাং
কন্দর্পাগমতন্ত্রমূলগুরবে কল্যাণকেলীভুবে ।
কামাক্ষ্যা ঘনসারপুঞ্জরজসে কামদ্রুহশ্চক্ষুষাং
মন্দারস্তবকপ্রভামদমুষে মন্দস্মিতজ্যোতিষে ॥ ১॥

সধ্রীচে নবমল্লিকাসুমনসাং নাসাগ্রমুক্তামণে-
রাচার্যায মৃণালকাণ্ডমহসাং নৈসর্গিকায দ্বিষে ।
স্বর্ধুন্যা সহ যুধ্বেন হিমরুচেরর্ধাসনাধ্যাসিনে
কামাক্ষ্যাঃ স্মিতমঞ্জরীধবলিমাদ্বৈতায তস্মৈ নমঃ ॥ ২॥

কর্পূরদ্যুতিচাতুরীমতিতরামল্পীযসীং কুর্বতী
দৌর্ভাগ্যোদযমেব সংবিদধতী দৌষাকরীণাং ত্বিষাম্ ।
ক্ষুল্লানেব মনোজ্ঞমল্লিনিকরান্ফুল্লানপি ব্যঞ্জতী
কামাক্ষ্যা মৃদুলস্মিতাংশুলহরী কামপ্রসূরস্তু মে ॥ ৩॥

যা পীনস্তনমণ্ডলোপরি লসৎকর্পূরলেপাযতে
যা নীলেক্ষণরাত্রিকান্তিততিষু জ্যোৎস্নাপ্ররোহাযতে ।
যা সৌন্দর্যধুনীতরঙ্গততিষু ব্যালোলহংসাযতে
কামাক্ষ্যাঃ শিশিরীকরোতু হৃদযং সা মে স্মিতপ্রাচুরী ॥ ৪॥

যেষাং গচ্ছতি পূর্বপক্ষসরণিং কৌমুদ্বতঃ শ্বেতিমা

যেষাং সন্ততমারুরুক্ষতি তুলাকক্ষ্যাং শরচ্চন্দ্রমাঃ ।
যেষামিচ্ছতি কম্বুরপ্যসুলভামন্তেবসৎপ্রক্রিয়াং
কামাক্ষ্যা মমতাং হরন্তু মম তে হাসত্বিষামঙ্কুরাঃ ॥ ৫॥

আশাসীমসু সন্ততং বিদধতী নৈশাকরীং ব্যাক্রিয়াং
কাশানামভিমানভঙ্গকলনাকৌশল্যমাবিভ্রতী ।
ঈশানেন বিলোকিতা সকুতুকং কামাক্ষি তে কল্মষ-
ক্লেশাপাযকরী চকাস্তি লহরী মন্দস্মিতজ্যোতিষাম্ ॥ ৬॥

আরূঢস্য সমুন্নতস্তনতটীসাম্রাজ্যসিংহাসনং
কন্দর্পস্য বিভোর্জগত্রয়প্রাকট্যমুদ্রানিধেঃ ।
যস্যাশ্চামরচাতুরীং কলযতে রশ্মিচ্ছটা চঞ্চলা
সা মন্দস্মিতমঞ্জরী ভবতু নঃ কামায কামাক্ষি তে ॥ ৭॥

শম্ভোর্যা পরিরম্ভসম্ভ্রমবিধৌ নৈর্মল্যসীমানিধিঃ
গৈর্বাণীব তরঙ্গিণী কৃতমৃদুস্যন্দাং কলিন্দাত্মজাম্ ।
কল্মাষীকুরুতে কলঙ্কসুষমাং কণ্ঠস্থলীচুম্বিনীং
কামাক্ষ্যাঃ স্মিতকন্দলী ভবতু নঃ কল্যাণসন্দোহিনী ॥ ৮॥

জেতুং হারলতামিব স্তনতটীং সংজগ্মুষী সন্ততং
গন্তুং নির্মলতামিব দ্বিগুণিতাং মগ্না কৃপাস্রোতসি ।
লব্ধুং বিস্ময়নীযতামিব হরং রাগাকুলং কুর্বতী

মঞ্জুস্তে স্মিতমঞ্জরী ভবভযং মথ্নাতু কামাক্ষি মে ॥ ৯॥

শ্বেতাপি প্রকটং নিশাকররুচাং মালিন্যমাতন্বতী
শীতাপি স্মরপাবকং পশুপতেঃ সন্ধুক্ষযন্তী সদা ।
স্বাভাব্যাদধরাশ্রিতাপি নমতামুচ্চৈর্দিশন্তী গতিং
কামাক্ষি স্ফুটমন্তরা স্ফুরতু নস্ত্বন্মন্দহাসপ্রভা ॥ ১০॥

বক্ত্রশ্রীসরসীজলে তরলিতভ্রূবল্লিকল্লোলিতে
কালিম্না দধতী কটাক্ষজনুষা মাধুব্রতীং ব্যাপৃতিম্ ।
নির্নিদ্রামলপুণ্ডরীককুহনাপাণ্ডিত্যমাবিভ্রতী
কামাক্ষ্যাঃ স্মিতচাতুরী মম মনঃ কাতর্যমুন্মূলযেত্ ॥ ১১॥

নিত্যং বাধিতবন্ধুজীবমধরং মৈত্রীজুষং পল্লবৈঃ
শুদ্ধস্য দ্বিজমণ্ডলস্য চ তিরস্কর্তারমপ্যাশ্রিতা ।
যা বৈমল্যবতী সদৈব নমতাং চেতঃ পুনীতেতরাং
কামাক্ষ্যা হৃদযং প্রসাদযতু মে সা মন্দহাসপ্রভা ॥ ১২॥

দ্রুহ্যন্তী তমসে মুহুঃ কুমুদিনীসাহায্যমাবিভ্রতী
যান্তী চন্দ্রকিশোরশেখরবপুঃসৌধাঙ্গণে প্রেঙ্খণম্ ।
জ্ঞানাম্ভোনিধিবীচিকাং সুমনসাং কূলংকষাং কুর্বতী
কামাক্ষ্যাঃ স্মিতকৌমুদী হরতু মে সংসারতাপোদযম্ ॥ ১৩॥

কাশ্মীরদ্রবধাতুকর্দমরুচা কল্মাষতাং বিভ্রতী

হংসৌঘৈরিব কুর্বতী পরিচিতিং হারীকৃতৈর্মৌক্তিকৈঃ ।

বক্ষোজন্মতুষারশৈলকটকে সংচারমাতন্বতী

কামাক্ষ্যা মৃদুলস্মিতদ্যুতিময়ী ভাগীরথী ভাসতে ॥ ১৪॥

কম্বোর্বংশপরম্পরা ইব কৃপাসন্তানবল্লীভুবঃ

সম্ফুল্লস্তবকা ইব প্রসৃমরা মূর্তাঃ প্রসাদা ইব ।

বাক্পীযূষকণা ইব ত্রিপথগাপর্যাযভেদা ইব

ভ্রাজন্তে তব মন্দহাসকিরণাঃ কাঞ্চীপুরীনাযিকে ॥ ১৫॥

বক্ষোজে ঘনসারপত্ররচনাভঙ্গীসপত্নাযিতা

কণ্ঠে মৌক্তিকহারযষ্টিকিরণব্যাপারমুদ্রাযিতা ।

ওষ্ঠশ্রীনিকুরুম্বপল্লবপুটে প্রেঙ্খৎপ্রসূনাযিতা

কামাক্ষি স্ফুরতাং মদীযহৃদযে ত্বন্মন্দহাসপ্রভা ॥ ১৬॥

যেষাং বিন্দুরিবোপরি প্রচলিতো নাসাগ্রমুক্তামণিঃ

যেষাং দীন ইবাধিকণ্ঠমযতে হারঃ করালম্বনম্ ।

যেষাং বন্ধুরিবোষ্ঠযোররুণিমা ধত্তে স্বযং রঞ্জনং

কামাক্ষ্যাঃ প্রভবন্তু তে মম শিবোল্লাসায হাসাঙ্কুরাঃ ॥ ১৭॥

যা জাড্যাম্বুনিধিং ক্ষিণোতি ভজতাং বৈরাযতে কৈরবৈঃ

নিত্যং যাং নিযমেন যা চ যততে কর্তুং ত্রিণেত্রোৎসবম্ ।

বিম্বং চান্দ্রমসং চ বঞ্চযতি যা গর্বেণ সা তাদৃশী
কামাক্ষি স্মিতমঞ্জরী তব কথং জ্যোৎস্নেত্যসৌ কীর্ত্যতে ॥ ১৮॥

আরূঢা রভসাৎপুরঃ পুররিপোরাশ্লেষণোপক্রমে
যা তে মাতরুপৈতি দিব্যতটিনীশঙ্কাকরী তৎক্ষণম্ ।
ওষ্ঠৌ বেপযতি ভ্রুবৌ কুটিলযত্যানম্রযত্যাননং
তাং বন্দে মৃদুহাসপূরসুষমামেকাম্রনাথপ্রিযে ॥ ১৯॥

বক্ত্রেন্দোস্তব চন্দ্রিকা স্মিতততির্বল্গু স্ফুরন্তী সতাং
স্যাচ্চেদ্যুক্তিমিদং চকোরমনসাং কামাক্ষি কৌতূহলম্ ।
এতচ্চিত্রমহর্নিশং যদধিকামেষা রুচিং গাহতে
বিম্বোষ্ঠদ্যুমণিপ্রভাস্বপি চ যদ্বিব্বোকমালম্বতে ॥ ২০॥

সাদৃশ্যং কলশাম্বুধের্বহতি যৎকামাক্ষি মন্দস্মিতং
শোভামোষ্ঠরুচাম্ব বিদ্রুমভবামেতাদ্বিদাং ব্রূমহে ।
একস্মাদুদিতং পুরা কিল পপৌ শর্বঃ পুরাণঃ পুমান্
এতন্মধ্যসমুদ্ভবং রসযতে মাধুর্যরূপং রসম্ ॥ ২১॥

উত্তুঙ্গস্তনকুম্ভশৈলকটকে বিস্তারিকস্তূরিকা-
পত্রশ্রীজুষি চঞ্চলাঃ স্মিতরুচঃ কামাক্ষি তে কোমলাঃ ।
সন্ধ্যাদীধিতিরঞ্জিতা ইব মুহুঃ সান্দ্রাধরজ্যোতিষা
ব্যালোলামলশারদাভ্রশকলব্যাপারমাতন্বতে ॥ ২২॥

ক্ষীরং দূরত এব তিষ্ঠতু কথং বৈমল্যমাত্রাদিদং

মাতস্তে সহপাঠবীথিমযতাং মন্দস্মিতৈর্মঞ্জুলৈঃ ।

কিং চেযং তু ভিদাস্তি দোহনবশাদেকং তু সংজাযতে

কামাক্ষি স্বযমর্থিতং প্রণমতামন্যত্তু দোদুহ্যতে ॥ ২৩॥

কর্পূরৈরমৃতৈর্জগজ্জননি তে কামাক্ষি চন্দ্রাতপৈঃ

মুক্তাহারগুণৈর্মৃণালবলযৈর্মুগ্ধস্মিতশ্রীরিযম্ ।

শ্রীকাঞ্চীপুরনাযিকে সমতযা সংস্তূযতে সজ্জনৈঃ

তত্তাদৃঙ্মম তাপশান্তিবিধযে কিং দেবি মন্দাযতে ॥ ২৪॥

মধ্যেগর্ভিতমঞ্জুবাক্যলহরীমাধ্বীঝরীশীতলা

মন্দারস্তবকাযতে জননি তে মন্দস্মিতাংশুচ্ছটা ।

যস্যা বর্ধযিতুং মুহুর্বিকসনং কামাক্ষি কামদ্রুহো

বল্গুর্বীক্ষণবিভ্রমব্যতিকরো বাসন্তমাসাযতে ॥ ২৫॥

বিম্বোষ্ঠদ্যুতিপুঞ্জরঞ্জিতরুচিস্ত্বন্মন্দহাসচ্ছটা ।

কল্যাণং গিরিসার্বভৌমতনযে কল্লোলযত্বাশু মে ।

ফুল্লন্মল্লিপিনদ্ধহল্লকমযী মালেব যা পেশলা

শ্রীকাঞ্চীশ্বরি মারমর্দিতুরুরোমধ্যে মুহুর্লম্বতে ॥ ২৬॥

বিভ্রাণা শরদভ্রবিভ্রমদশাং বিদ্যোতমানাপ্যসো

কামাক্ষি স্মিতমঞ্জরী কিরতি তে কারুণ্যধারারসম্ ।

আশ্চর্যং শিশিরীকরোতি জগতীশ্চালোক্য চৈনামহো
কামং খেলতি নীলকণ্ঠহৃদযং কৌতূহলান্দোলিতম্ ॥ ২৭॥

প্রেঙ্খৎপ্রৌঢকটাক্ষকুঞ্জকুহরেষ্বত্যচ্ছগুচ্ছাযিতং
বক্ত্রেন্দুচ্ছবিসিন্ধুবীচিনিচযে ফেনপ্রতানাযিতম্ ।
নৈরন্তর্যবিজৃম্ভিতস্তনতটে নৈচোলপট্টাযিতং
কালুষ্যং কবলীকরোতু মম তে কামাক্ষি মন্দস্মিতম্ ॥ ২৮॥

পীযূষং তব মন্থরস্মিতমিতি ব্যর্থৈব সাপপ্রথা
কামাক্ষি ধ্রুবমীদৃশং যদি ভবেদেতৎকথং বা শিবে ।
মন্দারস্য কথালবং ন সহতে মথ্নাতি মন্দাকিনী-
মিন্দুং নিন্দতি কীর্তিতেঽপি কলশীপাথোধিমীর্ষ্যাযতে ॥ ২৯॥

বিশ্বেষাং নযনোৎসবং বিতনুতাং বিদ্যোততাং চন্দ্রমা
বিখ্যাতো মদনান্তকেন মুকুটীমধ্যে চ সংমান্যতাম্ ।
আঃ কিং জাতমনেন হাসসুষমামালোক্য কামাক্ষি তে
কালঙ্কীমবলম্বতে খলু দশাং কল্মাষহীনোঽপ্যসৌ ॥ ৩০॥

চেতঃ শীতলযন্তু নঃ পশুপতেরানন্দজীবাতবো
নম্রাণাং নযনাধ্বসীমসু শরচ্চন্দ্রাতপোপক্রমাঃ ।
সংসারাখ্যসরোরুহাকরখলীকারে তুষারোৎকরাঃ
কামাক্ষি স্মরকীর্তিবীজনিকরাস্ত্বন্মন্দহাসাঙ্কুরাঃ ॥ ৩১॥

কর্মৌঘাখ্যতমঃকচাকচিকরান্কামাক্ষি সংচিন্তয়ে

ত্বন্মন্দস্মিতরোচিষাং ত্রিভুবনক্ষেমংকরানঙ্কুরান্ ।

যে বক্ত্রং শিশিরশ্রিয়ো বিকসিতং চন্দ্রাতপাম্ভোরুহ-

দ্বেষোদ্ধেষোণচাতুরীমিব তিরস্কর্তুং পরিষ্কুর্বতে ॥ ৩২॥

কুর্যুর্নঃ কুলশৈলরাজতনয়ে কূলংকষং মঙ্গলং

কুন্দস্পর্ধনচুঞ্চবস্তব শিবে মন্দস্মিতপ্রক্রমাঃ ।

যে কামাক্ষি সমস্তসাক্ষিনয়নং সন্তোষয়ন্তীশ্বরং

কর্পূরপ্রকরা ইব প্রসৃমরাঃ পুংসামসাধারণাঃ ॥ ৩৩॥

কম্রেণ স্নপয়স্ব কর্মকুহনাচোরেণ মারাগম-

ব্যাখ্যাশিক্ষণদীক্ষিতেন বিদুষামক্ষীণলক্ষ্মীপুষা ।

কামাক্ষি স্মিতকন্দলেন কলুষস্ফোটক্রিয়াচুঞ্চুনা

কারুণ্যামৃতবীচিকাবিহরণপ্রাচুর্যধুর্যেণ মাম্ ॥ ৩৪॥

ত্বন্মন্দস্মিতকন্দলস্য নিয়তং কামাক্ষি শঙ্কামহে

বিম্বঃ কশ্চন নূতনঃ প্রচলিতো নৈশাকরঃ শীকরঃ ।

কিংচ ক্ষীরপয়োনিধিঃ প্রতিনিধিঃ স্বর্বাহিনীবীচিকা-

বিব্বোকোঽপি বিডম্ব এব কুহনা মল্লীমতল্লীরুচঃ ॥ ৩৫॥

দুষ্কর্মার্কনিসর্গকর্কশমহস্সম্পর্কতপতং মিল-

ৎপঙ্কং শঙ্করবল্লভে মম মনঃ কাঞ্চীপুরালংক্রিয়ে ।

অম্ব ত্বন্মৃদুলস্মিতামৃতরসে মঙ্ক্ত্বা বিধূয ব্যথা-
মানন্দোদযসৌধশৃঙ্গপদবীমারোঢুমাকাঙ্ক্ষতি ॥ ৩৬॥

নম্রাণাং নগরাজশেখরসুতে নাকালযানাং পুরঃ
কামাক্ষি ত্বরযা বিপৎপ্রশমেন কারুণ্যধারাঃ কিরন্ ।
আগচ্ছন্তমনুগ্রহং প্রকটযন্নানন্দবীজানি তে
নাসীরে মৃদুহাস এব তনুতে নাথে সুধাশীতলঃ ॥ ৩৭॥

কামাক্ষি প্রথমানবিভ্রমনিধিঃ কন্দর্পদর্পপ্রসূঃ
মুগ্ধস্তে মৃদুহাস এব গিরিজে মুষ্ণাতু মে কিল্বিষম্ ।
যং দ্রষ্টুং বিহিতে করগ্রহ উমে শম্ভুস্ত্রপামীলিতং
স্বৈরং কারযতি স্ম তাণ্ডববিনোদানন্দিনা তণ্ডুনা ॥ ৩৮॥

ক্ষুণ্ণং কেনচিদেব ধীরমনসা কুত্রাপি নানাজনৈঃ
কর্মগ্রন্থিনিযন্ত্রিতৈরসুগমং কামাক্ষি সামান্যতঃ ।
মুগ্ধৈর্দ্রষ্টুমশক্যমেব মনসা মূঢস্য মে মৌক্তিকং
মার্গং দর্শযতু প্রদীপ ইব তে মন্দস্মিতশ্রীরিযম্ ॥ ৩৯॥

জ্যোৎস্নাকান্তিভিরেব নির্মলতরং নৈশাকরং মণ্ডলং
হংসৈরেব শরদ্বিলাসসমযে ব্যাকোচমম্ভোরুহম্ ।
স্বচ্ছৈরেব বিকস্বরৈরুডুগণৈঃ কামাক্ষি বিম্বং দিবঃ
পুণ্যৈরেব মৃদুস্মিতৈস্তব মুখং পুষ্ণাতি শোভাভরম্ ॥ ৪০॥

মানগ্রন্থিবিধুন্তুদেন রভসাদাস্বাদ্যমানে নব-

প্রেমাডম্বরপূর্ণিমাহিমকরে কামাক্ষি তে তৎক্ষণম্ ।

আলোক্য স্মিতচন্দ্রিকাং পুনরিমামুন্মীলনং জগ্মুষীং

চেতঃ শীলযতে চকোরচরিতং চন্দ্রার্ধচূডামণেঃ ॥ ৪১॥

কামাক্ষি স্মিতমঞ্জরীং তব ভজে যস্যাস্ত্বিষামঙ্কুরা-

নাপীনস্তনপানলালসতযা নিশ্শঙ্কমঙ্কেশযঃ ।

ঊর্ধ্বং বীক্ষ্য বিকর্ষতি প্রসৃমরানুদ্দামযা শুণ্ডযা

সূনুসুতে বিসশঙ্কযাশু কুহনাদন্তাবলগ্রামণীঃ ॥ ৪২॥

গাঢাশ্লেষবিমর্দসম্ভ্রমবশাদুদ্দামমুক্তাগুণ-

প্রালম্বে কুচকুম্ভযোর্বিগলিতে দক্ষদ্বিষো বক্ষসি ।

যা সখ্যেন পিনহ্যতি প্রচুরযা ভাসা তদীযাং দশাং

সা মে খেলতু কামকোটি হৃদযে সান্দ্রস্মিতাংশুচ্ছটা ॥ ৪৩॥

মন্দারে তব মন্থরস্মিতরুচাং মাৎসর্যমালোক্যতে

কামাক্ষি স্মরশাসনে চ নিযতো রাগোদযো লক্ষ্যতে ।

চান্দ্রীষু দ্যুতিমঞ্জরীষু চ মহান্দ্বেষাঙ্কুরো দৃশ্যতে

শুদ্ধানাং কথমীদৃশী গিরিসুতেঽতিশুদ্ধা দশা কথ্যতাম্ ॥ ৪৪॥

পীযূষং খলু পীযতে সুরজনৈর্দুগ্ধাম্বুধির্মথ্যতে

মাহেশৈশ্চ জটাকলাপনিগডৈর্মন্দাকিনী নহ্যতে ।

শীতাংশুঃ পরিভূযতে চ তমসা তস্মাদনেতাদৃশী
কামাক্ষি স্মিতমঞ্জরী তব বচোবৈদগ্ধ্যমুল্লঙ্ঘতে ॥ ৪৫॥

আশঙ্কে তব মন্দহাসলহরীমন্যাদৃশীং চন্দ্রিকা-
মেকাম্রেশকুটুম্বিনি প্রতিপদং যস্যাঃ প্রভাসংগমে ।
বক্ষোজাম্বুরুহে ন তে রচযতঃ কাংচিদ্দশাং কৌশ্মলী-
মাস্যাম্ভোরুহমম্ব কিংচ শনকৈরালম্বতে ফুল্লতাম্ ॥ ৪৬॥

আস্তীর্ণাধরকান্তিপল্লবচযে পাতং মুহুর্জগ্মুষী
মারদ্রোহিণি কন্দলৎস্মরশরজ্বালাবলীর্ব্যঞ্জতী ।
নিন্দন্তী ঘনসারহারবলযজ্যোৎস্নামৃণালানি তে
কামাক্ষি স্মিতচাতুরী বিরহিণীরীতিং জগাহেতরাম্ ॥ ৪৭॥

সূর্যালোকবিধৌ বিকাসমধিকং যান্তী হরন্তী তম-
স্সন্দোহং নমতাং নিজস্মরণতো দোষাকরদ্বেষিণী ।
নির্যান্তী বদনারবিন্দকুহরান্নির্ধূতজাড্যা নৃণাং
শ্রীকামাক্ষি তব স্মিতদ্যুতিমযী চিত্রীযতে চন্দ্রিকা ॥ ৪৮॥

কুণ্ঠীকুর্যুরমী কুবোধঘটনামস্মন্মনোমাথিনীং
শ্রীকামাক্ষি শিবংকরাস্তব শিবে শ্রীমন্দহাসাঙ্কুরাঃ ।
যে তন্বন্তি নিরন্তরং তরুণিমস্তম্বেরমগ্রামণী-
কুম্ভদ্বন্দ্ববিডম্বিনি স্তনতটে মুক্তাকুথাডম্বরম্ ॥ ৪৯॥

প্রেঙ্খন্তঃ শরদম্বুদা ইব শনৈঃ প্রেমানিলৈঃ প্রেরিতা

মজ্জন্তো মন্দনারিকণ্ঠসুষমাসিন্ধৌ মুহুর্মন্থরম্ ।

শ্রীকামাক্ষি তব স্মিতাংশুনিকরাঃ শ্যামায়মানশ্রিয়ো

নীলাম্ভোধরনৈপুণীং তত ইতো নির্নিদ্রয়ন্ত্যঞ্জসা ॥ ৫০॥

ব্যাপারং চতুরাননৈকবিহৃতৌ ব্যাকুর্বতী কুর্বতী

রুদ্রাক্ষগ্রহণং মহেশি সততং বাগূর্মিকল্লোলিতা ।

উৎফুল্লং ধবলারবিন্দমধরীকৃত্য স্ফুরন্তী সদা

শ্রীকামাক্ষি সরস্বতী বিজয়তে ত্বন্মন্দহাসপ্রভা ॥ ৫১॥

কর্পূরদ্যুতিতস্করেণ মহসা কল্মাষয়ত্যাননং

শ্রীকাঞ্চীপুরনায়িকে পতিরিব শ্রীমন্দহাসোঽপি তে ।

আলিঙ্গত্যতিপীবরাং স্তনতটীং বিম্বাধরং চুম্বতি

প্রৌঢং রাগভরং ব্যনক্তি মনসো ধৈর্যং ধুনীতেতরাম্ ॥ ৫২॥

বৈশদ্যেন চ বিশ্বতাপহরণক্রীডাপটীয়স্তয়া

পাণ্ডিত্যেন পচেলিমেন জগতাং নেত্রোৎসবোৎপাদনে ।

কামাক্ষি স্মিতকন্দলৈস্তব তুলামারোঢুমুদ্যোগিনী

জ্যোৎস্নাসৌ জলরাশিপোষণতয়া দূষ্যাং প্রপন্না দশাম্ ॥ ৫৩॥

লাবণ্যাম্বুজিনীমৃণালবলয়ৈঃ শৃঙ্গারগন্ধদ্বিপ-

গ্রামণ্যঃ শ্রুতিচামরৈস্তরুণিমস্বারাজ্যতেজোঙ্কুরৈঃ ।

আনন্দামৃতসিন্ধুবীচিপৃষতৈরাস্যাব্জহংসৈস্তব

শ্রীকামাক্ষি মথান মন্দহসিতৈর্মৎকং মনঃকল্মষম্ ॥ ৫৪॥

উত্তুঙ্গস্তনমণ্ডলীপরিচলন্মাণিক্যহারচ্ছটা-

চঞ্চচ্ছোণিমপুঞ্জমধ্যসরণিং মাতঃ পরিষ্কুর্বতী ।

যা বৈদগ্ধ্যমুপৈতি শংকরজটাকান্তারবাটীপত-

ৎস্বর্বাপীপযসঃ স্মিতদ্যুতিরসৌ কামাক্ষি তে মঞ্জুলা ॥ ৫৫॥

সন্নামৈকজুষা জনেন সুলভং সংসূচযন্তী শনৈ-

রুত্তুঙ্গস্য চিরাদনুগ্রহতরোরুৎপৎস্যমানং ফলম্ ।

প্রাথম্যেন বিকস্বরা কুসুমবৎপ্রাগল্ভ্যমভ্যেযুষী

কামাক্ষি স্মিতচাতুরী তব মম ক্ষেমংকরী কল্পতাম্ ॥ ৫৬॥

ধানুষ্কাগ্রসরস্য লোলকুটিলভ্রূলেখযা বিভ্রতো

লীলালোকশিলীমুখং নববযস্সাম্রাজ্যলক্ষ্মীপুষঃ ।

জেতুং মন্মথমর্দিনং জননি তে কামাক্ষি হাসঃ স্বযং

বল্গুর্বিভ্রমভূভৃতো বিতনুতে সেনাপতিপ্রক্রিযাম্ ॥ ৫৭॥

যন্নাকম্পত কালকূটকবলীকারে চুচুম্বে ন যদ্-

গ্লান্যা চক্ষুষি রূষিতানলশিখে রুদ্রস্য তত্তাদৃশম্ ।

চেতো যৎপ্রসভং স্মরজ্বরশিখিজ্বালেন লেলিহ্যতে

তৎকামাক্ষি তব স্মিতাংশুকলিকাহেলাভবং প্রাভবম্ ॥ ৫৮॥

সন্তিন্নেব সুপর্বলোকতটিনী বীচীচয়ৈর্যামুনৈঃ

সংমিশ্রেব শশাঙ্কদীপ্তিলহরী নীলৈর্মহানীরদৈঃ ।

কামাক্ষি স্ফুরিতা তব স্মিতরুচিঃ কালাঞ্জনস্পর্ধিনা

কালিম্না কচরোচিষাং ব্যতিকরে কাংচিদ্দশামশ্নুতে ॥ ৫৯॥

জানীমো জগদীশ্বরপ্রণয়িনি ত্বন্মন্দহাসপ্রভাং

শ্রীকামাক্ষি সরোজিনীমভিনবামেষা যতঃ সর্বদা ।

আস্যেন্দোরবলোকেন পশুপতেরভ্যেতি সম্ফুল্লতাং

তন্দ্রালুস্তদভাব এব তনুতে তদ্বৈপরীত্যক্রমম্ ॥ ৬০॥

যান্তী লোহিতিমানমভ্রতটিনী ধাতুচ্ছটাকর্দমৈঃ

ভান্তী বালগভস্তিমালিকিরণৈর্মেঘাবলী শারদী ।

বিম্বোষ্ঠদ্যুতিপুঞ্জচুম্বনকলাশোণায়মানেন তে

কামাক্ষি স্মিতরোচিষা সমদশামারোঢুমাকাঙ্ক্ষতে ॥ ৬১॥

শ্রীকামাক্ষি মুখেন্দুভূষণমিদং মন্দস্মিতং তাবকং

নেত্রানন্দকরং তথা হিমকরো গচ্ছেদ্যথা তিগ্মতাম্ ।

শীতং দেবি তথা যথা হিমজলং সন্তাপমুদ্রাস্পদং

শ্বেতং কিংচ তথা যথা মলিনতাং ধত্তে চ মুক্তামণিঃ ॥ ৬২॥

ত্বন্মন্দস্মিতমঞ্জরীং প্রসৃমরাং কামাক্ষি চন্দ্রাতপং

সন্তঃ সন্ততমামনন্ত্যমলতা তল্লক্ষণং লক্ষ্যতে ।

অস্মাকং ন ধুনোতি তাপকমধিকং ধূনোতি নাভ্যন্তরং
ধ্বান্তং তৎখলু দুঃখিনো বযমিদং কেনোতি নো বিদ্মহে ॥ ৬৩॥

নম্রস্য প্রণযপ্ররূঢকলহচ্ছেদায পাদাব্জযোঃ
মন্দং চন্দ্রকিশোরশেখরমণেঃ কামাক্ষি রাগেণ তে।
বন্ধূকপ্রসবশ্রিযং জিতবতো বংহীযসীং তাদৃশীং
বিম্বোষ্ঠস্য রুচিং নিরস্য হসিতজ্যোৎস্না বযস্যাযতে ॥ ৬৪॥

মুক্তানাং পরিমোচনং বিদধতস্তৎপ্রীতিনিষ্পাদিনী
ভূযো দূরত এব ধূতমরুতস্তৎপালনং তন্বতী।
উদ্ভূতস্য জলান্তরাদবিরতং তদ্দূরতাং জগ্মুষী
কামাক্ষি স্মিতমঞ্জরী তব কথং কম্বোস্তুলামশ্নুতে ॥ ৬৫॥

শ্রীকামাক্ষি তব স্মিতদ্যুতিঝরীবৈদগ্ধ্যলীলাযিতং
পশ্যন্তোঽপি নিরন্তরং সুবিমলংমন্যা জগন্মণ্ডলে।
লোকং হাসযিতুং কিমর্থমনিশং প্রাকাশ্যমাতন্বতে
মন্দাক্ষং বিরহয্য মঙ্গলতরং মন্দারচন্দ্রাদযঃ ॥ ৬৬॥

ক্ষীরাব্ধেরপি শৈলরাজতনযে ত্বন্মন্দহাসস্য চ
শ্রীকামাক্ষি বলক্ষিমোদযনিধেঃ কিংচিদ্ভিদাং ব্রূমহে।
একস্মৈ পুরুষায দেবি স দদৌ লক্ষ্মীং কদাচিৎপুরা
সর্বেভ্যোঽপি দদাত্যসৌ তু সততং লক্ষ্মীং চ বাগীশ্বরীম্ ॥ ৬৭॥

শ্রীকাঞ্চীপুররত্নদীপকলিকে তান্যেব মেনাত্মজে
চাকোরাণি কুলানি দেবি সুতরাং ধন্যানি মন্যামহে ।
কম্পাতীরকুটুম্বচংক্রমকলাচুঞ্চূনি চঞ্চূপুটৈঃ
নিত্যং যানি তব স্মিতেন্দুমহসামাস্বাদমাতন্বতে ॥ ৬৮॥

শৈত্যপ্রক্রমমাশ্রিতোঽপি নমতাং জাড্যপ্রথাং ধূনযন্
নৈর্মল্যং পরমং গতোঽপি গিরিশং রাগাকুলং চারযন্ ।
লীলালাপপুরস্সরোঽপি সততং বাচংযমান্প্রীণযন্
কামাক্ষি স্মিতরোচিষাং তব সমুল্লাসঃ কথং বর্ণ্যতে ॥ ৬৯॥

শ্রোণীচঞ্চলমেখলামুখরিতং লীলাগতং মন্থরং
ভ্রূবল্লীচলনং কটাক্ষবলনং মন্দাক্ষবীক্ষাচণম্ ।
যদ্বৈদগ্ধ্যমুখেন মন্মথরিপুং সংমোহযন্ত্যঞ্জসা
শ্রীকামাক্ষি তব স্মিতায সততং তস্মৈ নমস্সকুর্মহে ॥ ৭০॥

শ্রীকামাক্ষি মনোজ্ঞমন্দহসিতজ্যোতিষ্প্ররোহে তব
স্ফীতশ্বেতিমসার্বভৌমসরণিপ্রাগল্ভ্যমভ্যেযুষি ।
চন্দ্রোঽযং যুবরাজতাং কলযতে চেটীধুরং চন্দ্রিকা
শুদ্ধা সা চ সুধাঝরী সহচরীসাধর্ম্যমালম্বতে ॥ ৭১॥

জ্যোৎস্না কিং তনুতে ফলং তনুমতামৌষ্ণ্যপ্রশান্তিং বিনা
ত্বন্মন্দস্মিতরোচিষা তনুমতাং কামাক্ষি রোচিষ্ণুনা ।

সন্তাপো বিনিবার্যতে নববযঃপ্রাচুর্যমঙ্কূর্যতে

সৌন্দর্যং পরিপূর্যতে জগতি সা কীর্তিশ্চ সংচার্যতে ॥ ৭২॥

বৈমল্যং কুমুদশ্রিযাং হিমরুচঃ কান্ত্যেব সন্ধুক্ষ্যতে

জ্যোৎস্নারোচিরপি প্রদোষসমযং প্রাপ্যেব সম্পদ্যতে ।

স্বচ্ছত্বং নবমৌক্তিকস্য পরমং সংস্কারতো দৃশ্যতে

কামাক্ষ্যাঃ স্মিতদীধিতের্বিশদিমা নৈসর্গিকো ভাসতে ॥ ৭৩॥

প্রাকাশ্যং পরমেশ্বরপ্রণযিনি ত্বন্মন্দহাসশ্রিযঃ

শ্রীকামাক্ষি মম ক্ষিণোতু মমতাবৈচক্ষণীমক্ষযাম্ ।

যদ্ভীত্যেব নিলীযতে হিমকরো মেঘোদরে শুক্তিকা-

গর্ভে মৌক্তিকমণ্ডলী চ সরসীমধ্যে মৃণালী চ সা ॥ ৭৪॥

হেরম্বে চ গুহে হর্ষভরিতং বাৎসল্যমঙ্কূরযত্

মারদ্রোহিণি পূরুষে সহভুবং প্রেমাঙ্কুরং ব্যঞ্জযত্ ।

আনম্রেষু জনেষু পূর্ণকরুণাবৈদগ্ধ্যমুত্তালযত্

কামাক্ষি স্মিতমঞ্জসা তব কথংকারং মযা কথ্যতে ॥ ৭৫॥

সংক্রুদ্ধদ্বিজরাজকোঽপ্যবিরতং কুর্বন্দ্বিজৈঃ সংগমং

বাণীপদ্ধতিদূরগোঽপি সততং তৎসাহচর্যং বহন্ ।

অশ্রান্তং পশুদুর্লভোঽপি কলযন্পত্যৌ পশূনাং রতিং

শ্রীকামাক্ষি তব স্মিতামৃতরসস্যন্দো মযি স্পন্দতাম্ ॥ ৭৬॥

শ্রীকামাক্ষি মহেশ্বরে নিরুপমপ্রেমাঙ্কুরপ্রক্রমম্ং
নিত্যং যঃ প্রকটীকরোতি সহজামুন্নিদ্রযন্মাধুরীম্ ।
তত্তাদৃক্তব মন্দহাসমহিমা মাতঃ কথং মানিতাং
তন্মূর্ধ্না সুরনিম্নগাং চ কলিকামিন্দোশ্চ তাং নিন্দতি ॥ ৭৭॥

যে মাধুর্যবিহারমণ্টপভুবো যে শৈত্যমুদ্রাকরা
যে বৈশদ্যদশাবিশেষসুভগাস্তে মন্দহাসাঙ্কুরাঃ ।
কামাক্ষ্যাঃ সহজং গুণত্রযমিদং পর্যাযতঃ কুর্বতাং
বাণীগুম্ফনডম্বরে চ হৃদযে কীর্তিপ্ররোহে চ মে ॥ ৭৮॥

কামাক্ষ্যা মৃদুলস্মিতাংশুনিকরা দক্ষান্তকে বীক্ষণে
মন্দাক্ষগ্রহিলা হিমদ্যুতিমযূখাক্ষেপদীক্ষাঙ্কুরাঃ ।
দাক্ষ্যং পক্ষ্মলযন্তু মাক্ষিকগুডদ্রাক্ষাভবং বাক্ষু মে
সূক্ষ্মং মোক্ষপথং নিরীক্ষিতুমপি প্রক্ষালযেযুর্মনঃ ॥ ৭৯॥

জাত্যা শীতশীতলানি মধুরাণ্যেতানি পূতানি তে
গাঙ্গানীব পযাংসি দেবি পটলান্যল্পস্মিতজ্যোতিষাম্ ।
এনঃপঙ্কপরম্পরামলিনিতামেকাম্রনাথপ্রিযে
প্রজ্ঞানাৎসুতরাং মদীযধিষণাং প্রক্ষালযন্তু ক্ষণাত্ ॥ ৮০॥

অশ্রান্তং পরতন্ত্রিতঃ পশুপতিস্ত্বন্মন্দহাসাঙ্কুরৈঃ
শ্রীকামাক্ষি তদীযবর্ণসমতাসঙ্গেন শঙ্কামহে ।

ইন্দুং নাকধুনীং চ শেখরযতে মালাং চ ধত্তে নবৈঃ
বৈকুণ্ঠৈরবকুণ্ঠনং চ কুরুতে ধূলীচযৈর্ভাস্মনৈঃ ॥ ৮১॥

শ্রীকাঞ্চীপুরদেবতে মৃদুবচস্সৌরভ্যমুদ্রাস্পদং
প্রৌঢপ্রেমলতানবীনকুসুমং মন্দস্মিতং তাবকম্ ।
মন্দং কন্দলতি প্রিযস্য বদনালোকে সমাভাষণে
শ্লক্ষ্ণে কুঙ্মলতি প্ররূঢপুলকে চাশ্লোষণে ফুল্লতি ॥ ৮২॥

কিং ত্রৈস্রোতসমন্বিকে পরিণতং স্রোতশ্চতুর্থং নবং
পীযূষস্য সমস্ততাপহরণং কিংবা দ্বিতীযং বপুঃ ।
কিংস্বিত্ত্বন্নিকটং গতং মধুরিমাভ্যাসায গব্যং পযঃ
শ্রীকাঞ্চীপুরনাযকপ্রিযতমে মন্দস্মিতং তাবকম্ ॥ ৮৩॥

ভূষা বক্ত্রসরোরুহস্য সহজা বাচাং সখী শাশ্বতী
নীবী বিভ্রমসন্ততেঃ পশুপতেঃ সৌধী দৃশাং পারণা ।
জীবাতুর্মদনশ্রিযঃ শশিরুচেরুচ্চাটনী দেবতা
শ্রীকামাক্ষি গিরামভূমিমযতে হাসপ্রভামঞ্জরী ॥ ৮৪॥

সূতিঃ শ্বেতিমকন্দলস্য বসতিঃ শৃঙ্গারসারশ্রিযঃ
পূর্তিঃ সূক্তিঝরীরসস্য লহরী কারুণ্যপাথোনিধেঃ ।
বাটী কাচন কৌসুমী মধুরিমস্বারাজ্যলক্ষ্ম্যাস্তব
শ্রীকামাক্ষি মমাস্তু মঙ্গলকরী হাসপ্রভাচাতুরী ॥ ৮৫॥

জন্তূনাং জনিদুঃখমৃত্যুলহরীসন্তাপনং কৃন্ততঃ

প্রৌঢানুগ্রহপূর্ণশীতলরুচো নিত্যোদযং বিভ্রতঃ ।

শ্রীকামাক্ষি বিসৃত্বরা ইব করা হাসাঙ্কুরাস্তে হঠা-

দালোকেন নিহন্ত্যরন্ধতমসস্তোমস্য মে সন্ততিম্ ॥ ৮৬॥

উত্তুঙ্গস্তনমণ্ডলস্য বিলসল্লাবণ্যলীলানটী-

রঙ্গস্য স্ফুটমূর্ধ্বসীমনি মুহুঃ প্রাকাশ্যমভ্যেযুষী ।

শ্রীকামাক্ষি তব স্মিতদ্যুতিততির্বিম্বোষ্ঠকান্ত্যঙ্কুরৈঃ

চিত্রাং বিদ্রুমমুদ্রিতাং বিতনুতে মৌক্তীং বিতানশ্রিযম্ ॥ ৮৭॥

স্বাভাব্যাত্তব বক্ত্রমেব ললিতং সন্তোষসম্পাদনং

শম্ভোঃ কিং পুনরঞ্চিতস্মিতরুচঃ পাণ্ডিত্যপাত্রীকৃতম্ ।

অম্ভোজং স্বত এব সর্বজগতাং চক্ষুঃপ্রিযম্ভাবুকং

কামাক্ষি স্ফুরিতে শরদ্বিকসিতে কীদৃগ্বিধং ভ্রাজতে ॥ ৮৮॥

পুম্ভির্নির্মলমানসৌর্বিদধতে মৈত্রীং দৃঢং নির্মলাং

লব্ধ্বা কর্মলযং চ নির্মলতরাং কীর্তিং লভন্তেতরাম্ ।

সূক্তিং পক্ষ্মলযন্তি নির্মলতমাং যত্তাবকাঃ সেবকাঃ

তৎকামাক্ষি তব স্মিতস্য কলযা নৈর্মল্যসীমানিধেঃ ॥ ৮৯॥

আকর্ষন্নযনানি নাকিসদসাং শৈত্যেন সংস্তম্ভয-

ন্নিন্দুং কিংচ বিমোহযন্পশুপতিং বিশ্বার্তিমুচ্চাটযন্ ।

হিংসৎসংসৃতিডম্বরং তব শিবে হাসাহ্বযো মান্ত্রিকঃ

শ্রীকামাক্ষি মদীযমানসতমোবিদ্বেষণে চেষ্টতাম্ ॥ ৯০॥

ক্ষেপীযঃ ক্ষপযন্তু কল্মষভযান্যস্মাকমল্পস্মিত-

জ্যোতির্মণ্ডলচংক্রমাস্তব শিবে কামাক্ষি রোচিষ্ণবঃ ।

পীডাকর্মঠকর্মঘর্মসমযব্যাপারতাপানল-

শ্রীপাতা নবহর্ষবর্ষণসুধাস্রোতস্বিনীশীকরাঃ ॥ ৯১॥

শ্রীকামাক্ষি তব স্মিতৈন্দবমহঃপূরে পরিস্ফূর্জতি

প্রৌঢাং বারিধিচাতুরীং কলযতে ভক্তাত্মনাং প্রাতিভম্ ।

দৌর্গত্যপ্রসরাস্তমঃপটলিকাসাধর্ম্যমাবিভ্রতে

সর্বং কৈরবসাহচর্যপদবীরীতিং বিধত্তে পরম্ ॥ ৯২॥

মন্দারাদিষু মন্মথারিমহিষি প্রাকাশ্যরীতিং নিজাং

কাদাচিৎকতযা বিশঙ্ক্য বহুশো বৈশদ্যমুদ্রাগুণঃ ।

সাতত্যেন তব স্মিতে বিতনুতে স্বৈরাসনাবাসনাম্ ॥ ৯৩॥

ইন্ধানে ভববীতিহোত্রনিবহে কর্মৌঘচণ্ডানিল-

প্রৌঢিম্না বহুলীকৃতে নিপতিতং সন্তাপচিন্তাকুলম্ ।

মাতর্মাং পরিষিঞ্চ কিংচিদমলৈঃ পীযূষবর্ষৈরিব

শ্রীকামাক্ষি তব স্মিতদ্যুতিকণৈঃ শৈশির্যলীলাকরৈঃ ॥ ৯৪॥

ভাষায়া রসনাগ্রখেলনজুষঃ শৃঙ্গারমুদ্রাসখী-

লীলাজাতরতেঃ সুখেন নিয়মস্নানায় মেনাত্মজে ।

শ্রীকামাক্ষি সুধাময়ীব শিশিরা স্রোতস্বিনী তাবকী

গাঢানন্দতরঙ্গিতা বিজয়তে হাসপ্রভাচাতুরী ॥ ৯৫॥

সন্তাপং বিরলীকরোতু সকলং কামাক্ষি মচ্চেতনা

মজ্জন্তী মধুরস্মিতামরধুনীকল্লোলজালেষু তে ।

নৈরন্তর্যমুপেত্য মন্মথমরুল্লোলেষু যেষু স্ফুটং

প্রেমেন্দুঃ প্রতিবিম্বিতো বিতনুতে কৌতূহলং ধূর্জটেঃ ॥ ৯৬॥

চেতঃক্ষীরপয়োধিমন্থরচলদ্রাগাখ্যমন্থাচল-

ক্ষোভব্যাপৃতিসম্ভবাং জননি তে মন্দস্মিতশ্রীসুধাম্ ।

স্বাদংস্বাদমুদীতকৌতুকরসা নেত্রত্রয়ী শাংকরী

শ্রীকামাক্ষি নিরন্তরং পরিণমত্যানন্দবীচীময়ী ॥ ৯৭॥

আলোকে তব পঞ্চসায়করিপোরুদ্দামকৌতূহল-

প্রেঙ্খন্মারুতঘট্টনপ্রচলিতাদানন্দদুগ্ধাম্বুধেঃ ।

কাচিদ্বীচিরুদঞ্চতি প্রতিনবা সংবিৎপ্ররোহাত্মিকা

তাং কামাক্ষি কবীশ্বরাঃ স্মিতমিতি ব্যাকুর্বতে সর্বদা ॥ ৯৮॥

সূক্তিঃ শীলয়তে কিমদ্রিতনয়ে মন্দস্মিতাত্তে মুহুঃ

মাধুর্যাগমসম্প্রদায়মথবা সূক্তের্নু মন্দস্মিতম্ ।

ইত্থং কামপি গাহতে মম মনঃ সন্দেহমার্গভ্রমিং
শ্রীকামাক্ষি ন পারমার্থ্যসরণিস্ফূর্তৌ নিধত্তে পদম্ ॥ ৯৯॥

ক্রীডালোলকৃপাসরোরুহমুখীসৌধাঙ্গণেভ্যঃ কবি-
শ্রেণীবাক্পরিপাটিকামৃতঝরীসূতীগৃহেভ্যঃ শিবে ।
নির্বাণাঙ্কুরসার্বভৌমপদবীসিংহাসনেভ্যস্তব
শ্রীকামাক্ষি মনোজ্ঞমন্দহসিতজ্যোতিষ্কণেভ্যো নমঃ ॥ ১০০॥

আর্যামেব বিভাবয়ন্মনসি যঃ পাদারবিন্দং পুরঃ
পশ্যন্নারভতে স্তুতিং স নিয়তং লব্ধ্বা কটাক্ষচ্ছবিম্ ।
কামাক্ষ্যা মৃদুলস্মিতাংশুলহরীজ্যোৎস্নাবয়স্যান্বিতাম্
আরোহত্যপবর্গসৌধবলভীমানন্দবীচীময়ীম্ ॥ ১০১॥

{মন্দস্মিতশতকং সম্পূর্ণম্ ॥}

{শ্রী মূকপঞ্চশতী সম্পূর্ণা ॥}

{॥ ওঁ তত্ সত্ ॥}

Encoded and proofread by Sridhar Seshagiri sridhar.seshagiri at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Muka Pancha Shati Lyrics in Bengali PDF
% File name : shrImUka500.itx
% Category : trishati
% Location : doc_devii
% Author : mUka mahAkavi
% Language : Sanskrit
% Subject : stotra/hinduism/religion
% Transliterated by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Proofread by : Sridhar Seshagiri sridhar.seshagiri at gmail.com
% Latest update : January 6, 2003, March 10, 2013
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website